तदा शुद्धोऽयं क्रमः ॥ अन्यथा अशुद्ध. । एवं वल्ली ॥ उदाहरणम् ॥ प्रथमपक्षस्थवारादिकं १४ । ६ । ४९ । २४ तिथौ वारे च एको युक्तः १५ । ० वटी ४९ । ५० । २४ एतन्मध्ये चालनाको ० । ५७ । ३० रहितः जात द्वितीयकोष्ठस्थ वारादिक १५ । ० । ४८ । २६ । ५४ एव प्रथमपक्षस्थवल्ली ४१ । ४ । ४९ मध्ये चालनाको २ । ८ । ३३ । ३२ युक्तः जाता द्वितीया वल्ली ४३ । १३ । १२ । ३२ एवमग्रेऽपि ॥ तथा कृते जातम् । एवं कृते द्वितीयपक्षस्थे तिथ्यादितुल्यम् षोडशकोष्ठकस्थतिथ्यादिकं जातम् ॥ अथ वल्ल्यां य ऊर्ध्वाको भवति तत्तुल्य तिथिसौरमस्य कोष्टको ग्राह्यः वल्लीस्थोर्ध्वांकादध.स्थाया घटिका भवति तन्न्यूनंतदासन्नतिर्यक् पंक्तिस्थघटिकायातत्कोष्टकादधःस्थघटिकाभिः सहांतर कार्यम् ॥ तद्धनर्णसंज्ञक भवति ॥ यदा अधस्थघटीमध्ये शुद्धं तदा धनसज्ञकमंतर भवति ॥ अन्यथा ऋणसज्ञक भवति ॥ यदा चतुःपचाशत्तिर्यक्पक्तौ घटिकादिक फल गृहीत तदा तदधो घटिकाया अभावात् केन सह अतर कार्यमित्याह ॥ तिर्यक्पंक्तौ शून्यघटिकाया वल्लीस्थोर्ध्वांकतुल्यकोष्टकादध स्थघटिकाभिः सह अंतर कार्यमिति ॥ अत्रोदाहरणम् ॥ वल्ली । ५३ । ५६ । १०

१६	१५	१	२	३	४	५	६
६	०	१	२	३	४	५	६
४९	४८	४७	४६	४५	४४	४३	४२
२४	२६	२८	३१	३३	३६	३८	४०
०	२४	४८	१२	३६	०	२४	४८
४१	४३	४५	३७	४९	५१	५३	५६
४	१३	२१	३०	३१	४७	५६	४
४९	१२	५६	२९	३	३६	१०	४३
०	३२	४	३६	८	४०	१२	६४
७	८	९	१०	११	१२	१३	१४
०	१	२	३	४	५	६	०
४१	४०	३९	३८	३७	३६	३५	३५
१२	४५	४८	५०	५२	५५	५७	०
१२	३६	०	२४	४८	१२	३६	०
२८	१	२	४	६	८	११	१३
१३	२१	३०	३८	४७	५६	४	१३
१७	५८	२४	५७	३१	४	३८	१२
१२	४८	२०	५२	२४	५६	३८	०

त्रिचाशादधस्थतिर्यक्पक्तौ चतुष्चाशद्घटिकाया घचादिक ८ । १२ ।
चतुष्चाशत्कोष्ठकादधस्थतिर्यक्पक्तौ शून्यघटिकाया घचादिक ९ । ९
अनयोरतर १३ । एव बुद्धिमता ज्ञेम् ॥ तदनतर तिर्यक्पक्तौ या घटिका गृहीता
ता वल्लीस्थघटिकामध्ये शोध्या शेषा या घटिका पलानि भवति तेनातरेण गुण्यानि
पश्चात् षड्भिर्भक्तौ लब्धानि एतानि पूर्वस्थापितघटीमध्ये रहितानि सहितानि
कार्याणि तद्यथा ॥ यदा धनमतर तदा सहितानि ऋण तदा रहितानि कार्याणि॥
एव कृते या घटिका पलानि च भवति ता कोष्ठकस्थघटीमध्ये योज्या स्पष्टा
घटिका भवति ॥ तिथिरेव वारमुलंघ्य अग्रिम वार गच्छति तदा पूर्वस्मिन्वारे षष्टि-
घटिका तिथिकातिथि स्थाप्या ॥ यदैकवारे तिथिद्वय भवत् तदाऽवमदिनम ॥
तदा पूर्वोना परा कार्या सा स्पष्टा भवेत् ॥ अनया रीया नक्षत्रयोगसाधनम् ॥

	१४	१५	१	२	३	४	५	६
वा०	शु०	श०	र०	च०	मं०	बु०	बृ०	शु०
घ	५२	४६	४७	४६	४७	४९	५२	५६
प	२४	२५	३३	५२	३०	३१	३५	४४
	७	७	८	९	१०	११	१२	१३
वा०	श०	र०	च०	मं०	बु०	बृ०	शु०	श०
घ	६०	१	६	११	१६	२०	२३	२४
प	०	३३	४६	५४	३१	३२	१	३४

अथोदाहरणम्॥ प्रथमपक्षस्य प्रथमकोष्ठस्था वल्ली ४१।४।४९ अत्र वल्ल्यामूर्ध्वांके
एकचत्वारिंशद्वर्तते इति कारणात् तिथिसौरमस्थैकचत्वारिंशकोष्ठकादध स्थवल्ल्यां
घटिकाचतुष्टय वर्तते इति कारणात् तिर्यक्पक्तौ शून्यघटिकाया घटयाकः ३।९अयम्
अध स्थघटिकामध्ये २।९८ न शुध्यति अतः अपूर्वघटिकामध्ये शोधित ७ पलायम्
ऋणसज्ञम्॥अवातरे क्रियमाणे घटिस्थाने शून्यमेवावशिष्यते वल्लीस्थघटिकाशून्येन
गुणिताः शून्यमिव जात षड्भक्ते शून्यमिति कारणात्॥घटीस्थाने शून्यत्याग क्रियते
फल पलात्मकमतर गृह्यते वल्लीस्थघटिकादिकम् ४ । ४९ ६द तिर्यक्पक्तिस्थशून्य-
घटीभी रहित जातम्४।४९इदमतरेण गुणितम्३ ३।४३ षड्भक्त लब्धानि पलानि
९ एतानि पूर्वघटीमध्ये ३ । ९ रहितानि जातानि घटीपलानि ॥ ३। ० । एतानि
पूर्वस्थापितप्रथमपक्षस्य प्रथमकोष्ठघटीपलमध्ये।४९।२४।युतानि जातानि चैत्रशुद्ध

१४भृगौ घटीपलानि९२।२४ एवमग्रेऽपि योज्यम्॥ तथा कृते जातः प्रथमः पक्षः॥ एतदुदाहरणोपरि गणकेन गणिते क्रियमाणे यत्रकुत्रापि अङ्कमध्ये अंतरं पतति तर्हि मम न दोषः अस्माभिःशुद्धपुस्तकोपरिक्तमस्ति॥अथ नक्षत्रसाधनम्॥इष्टशकमध्ये १५११पुस्तकीयशके १५४४ शोधिते शेषं ७ शकादधस्थांकः २४।९।९।२८ शेषादधःस्थांकः १६।२।६।२३ अनयोर्योगेजातं ४०।७।१६।१देशांतरपलैः ४७ सहितं ४०।७।१६।४८ ऊर्ध्वांके सप्तविंशतिभिस्तष्टे जातं १३ तदधः सप्ततष्टे जातं०।एवं जातं १३।०।१६।४८ वर्षादौ तिथ्यादिकम्॥ यस्मिन्दिने तिथ्यारम्भो भवति तस्मिन्नेव दिने नक्षत्रयोगारंभ इति व्याप्तिर्नास्तीति तद्दिनात् पूर्वापरदिने वा भवति ॥ चैत्रशुक्ल१९ शनौ हस्तनक्षत्रप्रवृत्तिः॥ शकादधःस्था वल्ली ९३।१९।२१ शेषादधस्था वल्ली ४८।५१।९ योगः ४२।०।३०जाता नक्षत्रवल्ली इदं नक्षत्रादिकं वल्लीसहितं चतुर्दशस्थाने स्थाप्यम्॥अधिमासश्चेत्पंचदशस्थाने स्थाप्यम्॥अनुक्रमेण तत्तत्पक्षस्य नक्षत्रगुच्छायोज्याः॥ तद्यथा–प्रथमस्थाने शून्यकोष्टकादधःस्थं योज्यं द्वितीये प्रथमम्॥एवमग्रेऽपि तदधस्थवल्लीषु योज्या॥ एवं कृते जातं प्रथमपक्षस्थं वारादिकम्॥०।१६।४८ द्वितीयपक्षस्थं ६।३६।९८ प्रथमवल्ली४२।०।३०। द्वितीयवल्ली ४१।३१।९७॥एवमग्रेपि॥ अथ तत्तत्पक्षादिषु वारादौ तत्तत्पक्षचालनानि सहितानि कार्याणि॥वल्लीषु चालनानि धनानि कार्याणि प्रतिपक्षसंमर्विंशति-कोष्ठकाः ॥ तत्र प्रथकोष्ठे प्रथमकोष्ठस्थनक्षत्रादिकं स्थाप्यम् ॥ तदधस्तात् तत्तत्पक्षवल्ली स्थाप्या॥ तदनंतरं प्रथमकोष्ठस्थनक्षत्रादिकं यथास्थितमेव ॥ तन्मध्ये एको युक्तः कार्यः द्वितीयकोष्ठस्थनक्षत्रवारौ भवतः ॥ एवमग्रेऽपि ॥ तथा प्रथमकोष्ठस्थघटिका यथास्थिता एव ॥ तन्मध्ये अयं घटयादिश्चालनाङ्को ०।४४।४८। युक्तः सन् द्वितीयकोष्ठस्थं घटयादिकं भवति॥ तथा प्रथमकोष्ठस्था वल्ली यथास्थितैव ॥ तन्मध्येऽयं घटयादिचालनांको २।१३।१६ योजितः सन् द्वितीयकोष्ठस्था वल्ली भवति ॥ एवमग्रेऽपि ॥ उदाहरणम्–प्रथम कोष्ठस्थनक्षत्रादिकं १३।०।१६।४८। वारेण एको युक्तः॥ नक्षत्रे एको युक्तः॥ १४ घटीफलं १६।४८।एतन्मध्ये चालनांको० ।४४।४८ युक्तः जातं द्वितीयकोष्ठस्थं नक्षत्रादिकं १४।१।१७।३२।४८ एवं प्रथम-पक्षस्थवल्ली ४२।०।३० मध्ये चालनं २।१२।१९।३३ युक्तं जाता द्वितीया वल्ली ४४।१२।४९।३३ एवमग्रेऽपि ॥प्रथमकोष्ठस्था वल्ली

४२।०।३० नक्षत्रसौरभस्य द्विचत्वारिंशत्कोष्ठकादधःस्थे शून्यघटिकाया घट्यांकः १।४७ अधस्थांकः १।४२ अंतरम् ५ ऋणम् अनेनवल्लीस्थ घटी ०।३० पलानि गुणितानि १५० षष्ट्या भक्ते फलानि २।३० षड्भिर्भक्ते फलानि ०।२५ पूर्वघटिकामध्ये १।४७ रहितानि १।४६।३५ एतानि पूर्वस्थापितप्रथमपक्षस्य प्रथमकोष्ठस्थघटीपलमध्ये १६।४८ युतानि जाता घटिका १८।३५। एवं चैत्रशुक्ल १५ शनौ हस्तनक्षत्रस्थघटिकादि ॥ एवमग्रेऽपि ॥ इति नक्षत्रसाधनम् ॥

अथ योगसाधनम् ॥ इष्टशक १६५१ मध्ये पुस्तकीयशके १५४४ शोधिते शेषं ७ शकादधस्थांकः २४।५।११।५७ शेषादधस्थांकः १६।२।५।९ शकादधस्था वल्ली ५३।५६।३८ शेषादधःस्था वल्ली ४८।२।२८ वारादिकयोगे जातं ४०।७।१७।० देशांतरपलैः सहितैः ४०।७।१७।४७ ऊर्ध्वांके सप्तविंशतितष्टे जातं १३।७।१७।४७ वारेषु सप्ततष्टे जाते पूर्णम् ॥ वल्लीयोगः ४१।५९।६। योगादिकं वल्लीसहित चतुर्दशस्थाने स्थाप्यम् ॥ अधिमासश्चेत्पंचदशस्थाने स्थाप्यम् ॥ अथानुक्रमेण तत्तत्पक्षस्थयोगगुच्छा योज्याः ॥ तद्यथा । प्रथमस्थाने शून्यकोष्ठकादधस्थं वारादिकं ।०।०।० योजिते जातं ०।१७।४७ वल्लीषु योजिता वल्ली ४१।५९।६ एवं द्वितीयकोष्ठप्रथमकोष्ठस्थं वारादिकं ४।२७।२४ योजितं ।४।४५।११ वल्ली ५५।३६।२५ वल्लीषु योजिता जाता वल्ली ३७।२६।१ एवमग्रेऽपि ॥ प्रथमस्थयोगादिकं १३।०।१७।४७ योगस्थाने एको युक्तः वारे एको युक्तः घटीपलमध्ये १७।४७ घट्यादिश्चालनांको १।२५।४६ रहितः जातं द्वितीयकोष्ठकस्थं योगादिकं १४।१।१४।२१।१५ एवं प्रथमपक्षस्थवल्लीमध्ये चालनांको २।३।१३।१८ योजितः जाता द्वितीयकोष्ठस्था वल्ली ४४।२।११।८ एवमग्रेऽपि ॥ प्रथमकोष्ठस्था वल्ली ४१।५६।६ योगसौरभस्यैकचत्वारिंशत्कोष्ठकादधःस्थचतुष्पञ्चाशद् घटिकाया घट्यांकः १।४२ अधःस्थांकः १।३७ अंतरम् ऋणेनानेन वल्लीस्थघटीपलानि ५५।६ गुणितानि षड्भक्ते लब्धपलानि ४।१५ एतानि पूर्वघटिकामध्ये १।४२। रहितानि १।३८ जातानि घटीपलानि एतानि पूर्वस्थापितघटीपलमध्ये युतानि जातानि चैत्रशुक्ल १५ शनौ व्याघातयोगघटी १९ पलानि २९ एवमग्रेऽपि । तथा कृते जातः प्रथमपक्षः। अथेष्टतिथ्यादिसाधनम् । वर्षमध्ये यस्मिन्मासे या तिथिरपेक्ष्यते तत्तिथि

पर्यंतं चैत्रादिप्रतिपदमारभ्य तिथयः स्थाप्याः॥ ताः वर्षादितिथ्या हीनाः कार्याः शेषाः सौरवर्षादेरिष्टदिनपर्यंतं तिथयो भवन्ति॥ अभीष्टनक्षत्रयोगसाधने तास्तिथयो द्विष्ठाः एकत्र षट्त्रिंशदंशेन हीनाः॥ अपरत्र द्वाविंशांशेन युताः कार्याः॥ निरवयवेनोभयत्रापि वर्षादितो नक्षत्रयोगा भवंति॥ तिथयः पंचदशभक्ताः कार्याः॥ नक्षत्रयोगौ सप्तविंशतिभक्ताः फलं निरवयव ग्राह्यं ते तिथिनक्षत्रयोगकोष्ठाः स्युः एतत्कोष्ठकादधस्थस्वस्वगुच्छस्थवारादिकं स्थाप्यम्॥ वल्ली च स्थाप्या॥ वारादिकमत्र वर्षादिस्थदेशांतरसंस्कृतं वारादिकं योज्यं वल्लीषु वल्ली योज्या॥ तदनंतरं वारस्थाने पंचदशभागावशेषास्तिथियोगयुक्ताः कार्याः। वारस्थाने सप्तविंशाचष्टं कार्यम् एवं नक्षत्रयोगौ वर्षादिस्थनक्षत्रयोगाभ्यां स हितौ कार्यौ॥ सप्तविंशत्यधिके सप्तविंशतितष्टं कार्यममीष्टनक्षत्रयोगौ भवतः॥ अभीष्टतिथिस्तु ज्ञायत एवेति न तदानयने यत्नो विधेयः॥ वारादिकमध्ये स्वस्ववर्षादिस्थादेशान्तर संस्कृतं वारादिकं योज्यं वल्लीषु वल्लीयोज्या॥ वारस्थाने शेषा नक्षत्रयोगायुताः कार्याः, वारस्थाने सप्तभिस्तष्टं कार्यम्॥तदनतरं स्वस्वचालकाः शेषतिथ्यादिना गुण्याः॥ चालकश्चेद्धनस्तदा घटिस्थाने युक्ताः कार्याः॥ ऋगे रहिताः यदा तु शुद्ध्यति तदा वारादिका ग्राह्याः॥ एवमेव वल्ली॥ एवतिथिनक्षत्रयोगानां वारादिक भवति॥ वल्लीसहितम्॥ अस्मात् प्रागवत् स्वस्वसौरभोपरि घटिकाः साध्याः अभीष्टतिथ्यादिः स्पष्टाघटिका भवंति॥ उदाहरणम्॥ शके १६९१ वैशाखकृष्ण १० घटयायपनं तत्र चैत्रशुद्ध १ प्रतिपदमारभ्यदशमीपर्यंतमिष्टतिथयः २९ वर्षादितिथ्या १४ हीना ११ पंचदशभिर्भक्ताः फल० शेषं ११ तिथिगुच्छस्थं शून्यकोष्टकादधःस्थं वारादिकम् ०।०।० वल्लीच ०।०।० इद वर्षादिकं वारादिभिः ६।४९। २४ युतं वारस्थाने शेषतिथि ११ भिर्युक्तं सप्ततष्टं जातं वारादिकं॥ ३।४९।२४ वल्लीयोजिता ४१।-४।४९ चालकः० ।२७।३६ शेषतिथिभिर्गुणितः १०।३३ इदं घटीस्थने रहितं जातं ३। ३८।५१ वल्लीस्थाने चालकः २।८।३३।:३२ शेषतिथिभिर्गुणितः-२३।३४ अनेन वल्लीयुक्ता जाता वल्ली ४।३८।५२ आभ्यां प्रागवज्जाता वैशाखकृष्ण १० बुधे घटिका १६ पलानि ३१ एताः पूर्वानीततुल्य जाताः। अस्यां तिथौ नक्षत्रयोगानयनम्॥ शेषतिथयः ११ स्वषट्त्रिंशदंशेन रहिता जाताः ११ पुनस्ता एव तिथयः स्वद्वाविंशत्यंशेन युक्ता ११ जातौ

नक्षत्रयोगौ ॥ अनयोरूर्ध्वसप्तविंशतितष्टं फलं शून्यकोष्टकः नक्षत्रगुच्छस्थं शून्यकोष्टकादधःस्थं वारादि०।०।०योगगुच्छशून्यकोष्टस्थं वारादि ०।०।० वल्ली०।०।०नक्षत्रादिकं वारादिकं वारस्थाने शेषनक्षत्रैर्युतं ११। ०। ० इदं वर्षादिस्थकोष्टस्थनक्षत्रवारादिभिः ०।१६।४८ युतं सप्ततष्टं वारादिकं ४।१६।४८ वल्लीषु वल्ली युक्ता ४२।०।३० जाता वल्ली ४२।०।३० एवमेव जातयोगवारादिकं १७।४७ वल्ली ४१।५६।६ नक्षत्रचालकः ४४। ४८ शेषनक्षत्रैर्गुणितः ८।१२ इदं घटीस्थाने युतं जातं नक्षत्रं वारादिकं४।२५।१ वल्लीचालकः २। १२।१६।३२ शेषनक्षत्रैर्गुणितः२४।१५।२।२ अनेन वल्लीयुता जाता वल्ली६। १५।३२ पूर्वानीतनक्षत्रमध्ये वर्षादिस्थनक्षत्रं १३ युतं जातं२४शततारका नक्षत्रम् ॥ एवं प्राग्जातम् ॥ वैशाखकृष्णैकादश्यां गुरौ शततारकानक्षत्रस्य घटिकाः ३ पलानि ११ ॥ अथ योगवारादिस्थचालकः २। २५। ४६ शेषैर्गुणितः ३७।४३।२६ इदं घटीस्थाने रहितं जातं ३।४०।४ वल्लीस्थचालकः २।३।१३।८ शेषयोगैर्गुणितः ३२।३५।२४।२८ अनेन वल्लीयुता जाता ४। ३४। ३० पूर्वानीतयोगमध्ये ११ वर्षादिस्थयोगे युक्ते जातः भुक्तयोगः २४. एवं जातं वैशाखकृष्णदशम्यां बुधे योगघटिकाः १२ पलानि १० कदाचिन्नक्षत्रयोगौ अग्रिमतिथौ गच्छतः तदा शेषनक्षत्रयोगयोरेको रहितः कार्यः ॥ अथ संक्रांतिमहानक्षत्रसाधनम् ॥ इष्टशक १५।५१ मध्ये पुस्तकीयशके १५४४ शोधिते शेषम् ७ शकादधःस्थं वारादिकं ॥५।४१।१७ शेषादधःस्थं वारादिकं १। ४८।४० अनयोर्योगे जातं०।२९।५७ देशांतरपलैः ४७ सहितं जातोऽब्दपः ०।३०।४४ अयं द्वादशस्थाप्यः क्रमेण मेषादिद्वादशसंक्रान्तिक्षेपैर्युतः कार्यः द्वादशसंक्रान्तयः स्युः अब्दपमध्ये मेषसंक्रान्तिक्षेपको०।०।० युक्तः जाता मेषसंक्रान्तिः ०। ३०।४४ एवं चैत्रशुक्लपौर्णमास्यां शनौ आसु घटीषु मेषसंक्रान्तिप्रवेशः॥ वृषसंक्रान्तिक्षेपकः २ ।५७। १ अब्दपमध्ये युतो जातः ३। २७। ४५ भौमवारे आसु घटीषु २७। ४५ वृषसंक्रान्तिप्रवेशः॥ एवं मिथुनादिष्वपि ॥ एवमब्दपः सप्तविंशतिस्थाने स्थाप्यः॥अश्विन्यादिसप्तविंशतिक्षेपकैर्युक्तः कार्यः तत्तन्नक्षत्रप्रवेशो भवति । अश्विनीध्रुवांकः ॥ २६ । ० । ०।० मध्ये०।३०।४४ युक्तः अश्विनीप्रवेशः एवमग्रेऽपि ॥ चैत्रशुद्ध १५ शनौ आसु घटीषु ३०। ४४ अश्विनीप्रवेशः ॥ संक्रमात्संक्रमस्त्रिंशद्दिनांते प्रायो भवति ॥ नक्षत्रान्नक्षत्रप्रवेश-

श्चतुर्दशदिनांतरे भवति ॥ अथत्रिशदिनांते चतुर्दशदिनांतरे स्वस्ववारक्रमेण राशिनक्षत्रप्रवेशौ लेख्यौ ॥ अथ सायनसंक्रमणसाधनम् ॥ यस्मिन् राशौ सायन-सङ्क्रांतिरपेक्ष्यते तद्राशावयनांशाः शोध्याः । स राश्यादिः सूर्यो भवति॥तदासन्न-पञ्चांगावधिस्थसूर्येण सहांतरं कार्यम्॥ तस्य कलाः सूर्यगत्या भाज्याः फलं दिनाद्यं ग्राह्यं तदवधिस्थवारादौ सहितं रहितं कार्यम् ॥ तद्यथा—यदावधिस्थसूर्यादूनो भवति तदा सहितम्—अधिके रहितं कार्यमिति ॥ तस्मिन्वारे सायनसंक्रांति-घटिका भवन्ति ॥ उदाहरणम् ॥ शक.१६९१ सायनवृषसंक्रांतिः साध्यते ॥ अयनांशाः २१ । ५७ एकराशिमध्ये शोधितः जात. सूर्यः०।१२।३ अस्यासन्नो वशाशकृष्ण ३ शनौ अवध्यर्क ० । १३ । २८ । ३९ अनयोरंतरं कलाभिः ५८ । १२ भक्तं फलं दिनाद्य ० । ३६ । ४९ अवधिस्थवारादिकमध्ये ० । २९ । २७ रहित जाता वैशाखकृष्ण १२ भृगौ सायनवृषसंक्रांति घटिकाः ९२ । ४२ ॥अस्याः प्रशंसा ॥ तारैव पुण्यातिशय मुनीन्द्रा वसिष्ठ-मुख्या जगदुर्महांत. ॥ सद्युक्तियुक्तं च विलोक्यतेऽदः परं न चैतद्व्यवहारयोग्यम्॥ इति दिवाकरपंथम् ॥ अथ ग्रहसाधनम् ॥ इष्टशकमध्ये पुस्तकीयशके शोधिते यच्छेषं तत्प्रमितकोष्ठकादध स्थाकमध्ये पुस्तकीयशकादध.स्थाको योजितस्तदधः-स्थवारयोर्योगः कार्यो रव्यादिवर्तमानो वारो ज्ञेय ॥ एवं कृते इष्टवर्षात् प्रथमवर्षे फाल्गुनपौर्णमास्युत्तर याऽमावास्या तस्यामागतवासरे अर्धरात्रसमये ग्रहवल्ली भवति ॥ कदाचित्पूर्वपरदिने वा भवति यस्मिन् दिने आगतवासरो भवति तस्मिन् दिने ग्रहवल्ली ज्ञेया ॥ अत्र वारस्यैव प्राधान्यम् ॥ तदनतरम् एत-द्वल्ली स्वदिनमारभ्य मेषसंक्रांतिदिनपर्यंतम् अन्तरालदिवसैर्वल्लीचतुर्थांको युतः कार्यः सा मेषसंक्रांतावर्धरात्रसमये: ग्रहवल्ली भवति ।॥ मेषसंक्रांतिवल्लीचतु-र्थांके सप्त योज्या सप्तदिनांतरे वल्ली भवति ॥ एवमग्रेऽपि ॥ अवधिस्थवल्ल्युपरि मध्या स्पष्टा ग्रहा. साध्या. ॥ अथ मेषसंक्रांतिदिवसे मध्यमा ग्रहाः साध्याः ॥ देशान्तरबीजसंस्कृताः कार्या तेषु सप्तगुणिताः स्वस्वमध्यगतिर्योज्या ॥ ते अग्रिमावधिस्था भवन्ति ॥ एवमग्रेऽपि ॥ अथात्र यस्मिन् मासे यस्मिन् पक्षे ग्रहचालनमपेक्ष्यते तत्तत्पक्षमासचालनानि प्रथमग्रहदिनवल्ल्यां योज्यानि ॥ एवं कृते तत्पक्षे मासे ग्रहवल्ली भवति॥ यस्मिन् दिने ग्रहसाधनमपेक्षते तावद्भि-र्दिनैर्वल्लीचतुर्थांको युक्तः तावद्भिर्दिनैर्वारो युक्तः सप्ततष्टः कार्यः ॥ एवं कृते

इष्टवारः स एव वल्लीस्थो वार आयाति तदाऽभीष्टदिने ग्रहवल्ली भवति ॥ यदा-ऽभीष्टवारो नायाति तदा दिनद्वयेन एकेन दिनेन वा वल्लीचतुर्थांको युक्तः कार्यः यथाऽभीष्टो वार आयाति तथैव कार्यः ॥ पक्षवल्लीसंस्कारश्चैत्रशुद्धप्रतिपद-मारभ्य वर्तते ॥ एवं ग्रहवल्ली पूर्वमेव चतुर्दश्याम् अमावास्यायां वा आयाति इति कारणात् अयं संस्कार उक्तः ॥ अथ वारानयनम् ॥ ग्रहवल्ली षष्ट्या सव-र्णिता कार्याऽहर्गणो भवति ॥ पश्चात्सप्ततष्टे यच्छेषं तत्प्रमितशुक्रवारमारभ्य वर्तमानो वारो ज्ञेयः ॥ अत्रोदाहरणम् ॥ शके १५३४ वैशाखशुक्ल १५ ग्रह-साधनं क्रियते ॥ इष्टशक १५३४ मध्ये पुस्तकीयशके १५१४ शोधिते शेषं २० शेषादधःस्थांकः ० । २ । २ । ४ वारः २ शकादधःस्थांकः ७ । ५६ ८ । ५२ वारः ५ अनयोर्योगः ७ । ५८ । १० । ५६ । वारयोर्योगः ७ सप्ततष्टः शनिवारे जाता वल्ली ७ । ५८ १० । ५६ एतन्मध्ये वैशाखशुद्ध-पौर्णमासीस्थपक्षवल्ली ० । ० । ० । ४४ युता जाता वैशाखशुद्ध १५ अर्ध-रात्रसमये ग्रहवल्ली ७ । ५८ । ११ । ४१ वारेषु वारो २ युक्तः २० जातः सोमवारः ॥ इयं ग्रहवल्ली रव्यादिसर्वग्रहसाधने उपयुक्ता ॥ अत्रेदमवधेयम् ॥ प्रथमतश्चैत्रादिनिकटग्रहादिनवल्लीतो वक्ष्यमाणरीत्या सूर्यः साध्यः स यदि अपे-क्षितार्कसमस्तदा शुद्धा अन्यथा अशुद्धा ॥ यदि चार्कः एकराशिन्यूनाधिकः तदा वल्लीतलांके खरामा योज्याः शोध्याः पेऽपि क्रमाद्द्वयं देयं हेयं वा ॥ उदाहरणम् ॥ इष्टशकः १५५८ उक्तवज्जाता वल्ली ८ । ० । ३६ । ३७ वारश्च ५ वल्लीस्थसूर्यः १० । २६ । ४५ । २२ अपेक्षितमीनार्का-दून इति वल्लीचतुर्थांके खरामा योजिता जाता वल्ली ८ । ० । ३७ । ७ द्वययोजनाद्वारश्च० एतद्वल्लीस्थसूर्यः ११ । १९ । २६ । २७ अपेक्षितार्कसम इति १५५८ अस्मिन् चैत्रादितः प्रागमायां वल्ली शनौ जाता शुद्धा एवमधि-कत्वे द्रष्टव्यम् ॥ अत एवोक्तं दिवाकरेण—" अपेक्षितार्कादिति " ॥ अथ ग्रह-साधनम् ॥ स्वस्ववाटिकायां वल्ल्यां यश्चतुर्थांकः तत्प्रमितकोष्ठकस्थाश्चत्वा-रोऽङ्काः स्थाप्याः ॥ तदनंतरं वल्लीतृतीयांकतुल्यकोष्ठकस्थप्रथमांकं विहाय चत्वारोंकाः स्थाप्याः ॥ ततो वल्लीद्वितीयांकतुल्यकोष्ठस्थोर्ध्वांकद्वयं विहाय चत्वारोंकाः स्थाप्याः ॥ ततो वल्ली प्रथमांकतुल्यकोष्ठस्थोर्ध्वांकत्रयं विहाय चत्वा-रोंकाः स्थाप्याः ॥ ऊर्ध्वांकास्त्याज्याः ॥ ततस्तेषां योगः कार्यः । ऊर्ध्वांकः

षष्ट्यधिकः षष्टितष्टः कार्यः - सा ग्रहवल्ली· षष्ट्यादिर्भवति ॥ रविचन्द्रादिवल्ली भिन्ना लेख्या ॥ अग्रे उपयुक्तत्वात् ॥ तदनंतरं ग्रहवल्ली षड्गुण्या , अंशादिकं स्यात् ॥ अंशास्त्रिशद्भक्ता राशयो भवंति ॥ एवमर्धरात्रसमये राश्यादिग्रहा भवंति ॥ चन्द्रोच्चबुधभृगुवल्लीनां विशेषः ॥ उक्तवच्चन्द्रोच्चवल्ली कार्या ॥ तस्या ऊर्ध्वांके पंचचत्वारिंशयुक्ता कार्या तदनन्तरं चन्द्रवल्लीमध्ये शोध्या तदनन्तरं षड्-गुणिता कार्या चन्द्रोच्चं भवति ॥ यदा वल्लीमध्ये वल्ली न शुद्धयति तदोर्ध्वा षष्टियुता कार्या ॥ बुधशुक्रोच्चवल्लीमध्ये शोध्या तदनंतरं षड्गुणिता कार्या बुधशुक्रयोः-शीघ्रोच्चं भवति ॥ एवं ग्रहसाधनांते " रेखा. स्वदेशांतरयोजनघ्नी " इत्यादिना देशांतरसंस्कारः कार्यः ॥ अर्धरात्रे चराभावाच्चरसंस्कारो न भवति ॥ उदाहरणम् ॥ शके १९३४ वैशाखशुक्ल १९ वल्ली ७ । ५८ । ११ । ४० रविवाटिकायां चत्वारिंशत्कोष्ठकादधःस्थांकः ६ । ३४ । १४ । २७ एका-दशकोष्ठकादधःस्थांकार्यकं विहाय चत्वारोंकाः ४८ । २४ । ९८ । ३९ अष्टपंचाशत्कोष्ठकादधःस्थांकः ३८ । ५८ । २० । ३४ सप्तमकोष्ठकादधः-स्थांकः ३१ । ५२ । ८ । १४ चतुर्णां योगे जाता रविवल्ली १२९ । ४९ । ४१ । ५४ ऊर्ध्वांके षष्टितष्टे शेषं ९ । ४९ । ४१ । ५४ इदं षड्गुणं जाता अंशाः ३४ । ५८ । ११ । २४ अंशास्त्रिशद्भक्ताः लब्धं राशयः एवं राश्याद्यो रविः १ । ४ । ५८ । ११ चंद्रवल्ली ३९ । २ । १२ । ७ चंद्रः ७ । ० । १३ । १२ चंद्रोच्चवल्ली ५७ । ४१ । ६ । ३७ ऊर्ध्वांके, शरवेद ४५ युक्ता जाता ४२ । ४१ । ६ । ३७ इदं चन्द्रवल्लीमध्ये ३९ । २ । १२ । ७ रहितं जातं ५२ । २१ । ५ । ३० उच्चः १० । १४ । ६ । ३३ भौमवल्ली ४९ । ५३ । ३६ । १८ भौमः ९ । २९ । २१ । ३८ बुधोच्च-वल्ली ६१ । ३४ । ३३ । ५४ रविवल्ली ९ । ४९ । ४१ । ५४ मध्ये शुद्धा जाता १४ । १५ ।८। ० इदं षड्गुणं त्रिशद्भक्तं जातं बुधशीघ्रोच्चं २ । २५ । ३० । ४८ गुरुवल्ली २१ । ४३ । ३१ । ५८ गुरुः ४ । १० । ३१ । १२ शुक्रोच्चवल्ली ४३ । १९ । ३० । १९ रविवल्लीमध्ये शोधिता २२ । ३० । ११ । ३५ पूर्ववज्जातं शुक्रशीघ्रोच्च ४ । १५ । ११ । ९ शनिवल्ली ५४ । १७ । ४१ । २ शनिः १० । २५ । ४६ । ६ केतुवल्ली ३७ । ३० । ४४ । ४१ केतुः ७ । १९ । ४ । २८ अयं राशिषट्कयुक्तो

जातो राहुः १ । १९ । ४ । ३८ अथवा केतुवल्ल्यामूर्ध्वांके त्रिंश ३० युक्ता राहुवल्ली भवति । काश्यां देशांतरयोजनानि६४ऋणानि॥रेखा स्वदेशांतरयोजनघ्नी गतिर्ग्रहस्याभ्रगजैर्विभक्ता ॥ लब्धा विलिप्ता खचरे विधेया प्राच्यामृणं पश्चिमतो धनं च ॥ इत्यादिना देशांतरकलाः ४७ ऋणं देशांतरसंस्कृतो रविः १ । ४ । ९७ । २४ चन्द्रः ७ । ० । २ । ४० उच्चं १० । १४ । ६ । २८ भौमः ९ । २९ । २१ । १३ बुधोच्च २ । २९ । २७ । ३१ गुरुः ४ । १० । २१ । ८ शुक्रोच्चं ४ । १४ । ९९ । ९२ शनिः १० । २९ । ४६ । ९ राहुः १ । १९ । ४ ३० इष्टशकमध्ये १९३४ नवसर्वेंदुरामाः ३१७९ योजिता जातं कलिगतं ४७१३ कलिगतस्य सहस्रांशः १००० अंशादि ४।४२ । ४६ शनिबीजधनम् ॥ एतत्त्र्यंशे १ । ३४ । १६ महित जात बुधोच्चधनं तस्य धनम् ६ । १७ । १ शनिबीजत्र्यंशेन रहितं जातं ३ । ८ । ३१ ऋणं गुरोः शनिबीजं शुक्रोच्चऋणं ४ । ४२ । ४६ बीजसंस्कृतं बुधोच्चं ३ । १ । ४४ । ३२ गुरुः ४ । ७ । १२ । ३७ शुक्रोच्चं ४ । १० । १७ । ७ शनिः ११ । ० । २८ । ९१ ॥ अथ कश्चिद्विशेष उच्यते । यदा ग्रहदिनवल्ली अङ्कचतुष्टयमध्ये शून्यमायाति तदा ग्रहसाधनं कथं कार्यम् ? यतो ग्रहवाटिकायां शून्यकोष्टको नास्ति ॥ आदौ शून्यकोष्ठकमस्तीति चेत् तत्र शून्यस्थाने षष्टिर्वर्तते इति कारणात् शून्यकोष्ठकस्याभावाच्छून्यस्थाने फलाभावः ॥ तत्र अंकत्रययोगे ग्रहवल्ली भवति ॥ वाटिकायामंकवाटिकायामकग्रहणे शून्यस्थाने एकैकम् अंक विहाय योज्यमित्यनुवर्तते । यदा शून्यस्थाने षष्टिः स्थाप्यतेः तदा शून्यकोष्ठकादधःस्थाको ग्राह्यः ॥ एवमकचतुष्टययोगे ग्रहवल्ली भवति ॥ एवं प्रकारद्वये तुल्ये भवतो वल्ल्यौ ॥ कल्पिता वल्ली ७।९८। ० । ४० रविवाटिकायां चत्वारिंशत्कोष्टकादधःस्थाकः ६ । ३४ । १४ । २७ अष्टपञ्चाशत्कोष्टकादधःस्थांकः ३८ । ९८ । २० । ३४ सप्तमकोष्ठकादधःस्थांकः ३१ । ९२ । ८ । १४ एषां योगे जाता वल्ली १७ । २४ । ४३ । १९ अथवा ग्रहदिनवल्ली ७ । ९७ । ६० । ४० चत्वारिंशत्कोष्टकादधःस्थांकः ६ । ३४ । १४ । २७ शून्यकोष्ठकादधःस्थाकः ९१ । २१ । ४१ । ४४ सप्तपंचाशत्कोष्ठकादधःस्थांकः ४७ । ३६ । ३८ । ४९ सप्तमकोष्ठकादधःस्थांकः ३१ । ९२ । ८ । १४ एषां योगे जाता सैव रविवल्ली १७ । २४ ।

४३ । १९ एवं सर्वग्रहेषु शून्यस्थाने शून्यकोष्ठकस्थफलं चेद् गृह्यते तदा इयं वल्ली सम्पद्यते ८ । ४६ । २४ । ५९ तस्मादियमशुद्धा एतदुत्पन्नखेटैर्विसंवादात् ॥ यदा वल्ल्यामंकत्रये शून्यं तदा ऊर्ध्वांकप्रमितकोष्ठकस्थ अधस्थांकमध्ये अंकत्रयं त्यक्त्वा चत्वारोंका ग्राह्याः सैव ग्रहवल्ली ॥ अथ रवींद्वोः स्पष्टीकरणम् ॥ मन्दोच्चं रविमध्यशोध्यं मन्दकेन्द्रं भवति तस्य भुजांशांशाः कार्याः ॥ भुजांशतुल्यकोष्ठकादधःस्थमागाद्यं फलं ग्राह्यम् ॥ तदग्रिम-कोष्ठकस्थफलेन सहांतरं कार्यम् । तेनांतरेण भुजांशादधःस्थं कलाद्यं गुण्यं षष्ट्या भक्तं फलं कलाद्यं ग्राह्यम् एताः कलाः पूर्वस्थापितफलमध्ये युक्ताः कार्याः ॥ अग्रिम-कोष्ठकस्याधिकत्वात् ॥ अंशाद्यमदफलं भवति ॥ मेषादिषट्केन्द्रे ऋणम् ॥ तुलादिषट्के धनम् ॥ अनेन संस्कृतो रविः स्पष्टो भवति ॥ अथ गतिसाधनम् । फलादधःस्थं कलाद्यं गतिफलं ग्राह्य तदग्रिमांतरेण भुजांशाधःस्थं कलाद्य गुण्यं षष्ट्या भाज्यं फलं कलाद्यं ग्राह्यम् ॥ एताः कलाः पूर्वस्थापितगतिकलामध्ये सहिता रहिता कार्याः अग्रिमकोष्ठकवशात् ॥ इदं स्वकीयमध्यगतौ कर्कादिकेन्द्र धनम् ॥ मकरादौ ऋणम् ॥ सा स्पष्टा गतिः ॥ अनया रीत्या चंद्रस्य स्पष्टीकरणम् ॥ अथोदाहरणम् ॥ रवेर्मंदोच्च २।१७ । १७।० रविमध्ये पात्यरविमदकेंद्रं १० । १७ । ४० २४ अस्य भुजांशाः ४२ । १९ । ३६ द्विचत्वारिंशत्कोष्ठका-दधःस्थं फलं १ । २८ । ३ अग्रिमकोष्ठकस्थं फलं ॥ १ । २९ । ४६ अन्तर १ । ४३ अनेन कलाद्यं १९ । ३६ गुणितं ३३ । ३८ षष्टिभक्त फल कलाद्यम् ० । ३३ । ३८ इदं पूर्वस्थापितफलमध्ये १ । २८ । ३ सहितं जात रवेर्मंदफलं १ । २८ । ३६ तुलादिकेंद्रत्वाद्धनमनेन संस्कृतो जातः स्पष्टः सूर्यः ॥ १। ६ । २६ । ० फलादधःस्थ गतिफलं १ । ३८ अग्रिमांतरेण विकलात्मकेन कलाद्यं १९ । ३६ गुणित ३९ । १२ षष्टिभक्त अग्रिमांकस्य न्यूनत्वात् गतिफलमध्ये १ । ३८ रहितं जातं गतिफल १ । ३७ मकरादिकेन्द्रत्वात् ऋणम् अनेन मध्यमा गतिः ५९ । ८ संस्कृता जाता स्पष्टा गतिः ५७।३१ ॥ अथ चंद्रस्पष्टीकरणम् ॥ चंद्रोच्चं चंद्रमध्ये शोधितम् उच्चं १० । १४ । ६ । २८ चंद्रः ७ । ० । २ । ४० जातं चन्द्रस्य मंदकेंद्रं ८।१५ । ५६ । १२ दृक्तवन्मंदफलं धनम् ४ । ५३।५३ अनेन संस्कृतो जातः स्पष्टश्चन्द्रः ७ । ४ । ५६ । ३३ गतिफलं १६ । ५७ धनम् अनेन संस्कृता

मध्या गतिः ७। ९०। ३९ जाता स्पष्टा चंद्रस्य गतिः ८। ०७। ३२॥
अथ भौमादीनां स्पष्टीकरणम्। तत्र गुरुभौमशनीनां शीघ्रोच्चं मध्यमो रविः॥ बुधशुक्रयोः पूर्वं साधितमस्ति॥ यो मध्यमो रविः स एव बुधशुक्रौ॥ ग्रहमध्ये हीनं शीघ्रोच्चं कार्यं शीघ्रकेन्द्रं भवति॥ षड्भाधिकं द्वादशराशिभ्यः शोध्यं षड्भान्न्यूनं यथास्थितमेव तस्यांशाः कार्याः अंशप्रमितकोष्ठकादधःस्थशीघ्रफलं भागाद्यं स्थाप्यम्॥ अग्रिमांतरेण कलाद्यं गुण्यं षष्टिभक्तं फलं कलाद्यं ग्राह्यम्॥ तत्फलं पूर्वस्थापितफलमध्ये रहितं सहितं कार्यम्। अग्रिमकोष्ठवशात्॥ तदंशाद्यं शीघ्रफलं भवति॥ मेषादौ ऋणम्॥ तुलादौ धनम्॥ अस्यार्द्धेन मध्यमः संस्कृतः कार्यः॥ शीघ्रफलार्द्धं संस्कृतो भवति॥ तदनंतरमेतन्मध्ये मंदोच्चं शोध्यं मंदकेन्द्रं भवति॥ षड्भाधिकं द्वादशराशिभ्यः शोध्यं तस्यांशाः कार्याः तत्प्रमितकोष्ठकादधःस्थमंशाद्यं मंदफलं ग्राह्यम्॥ अग्रिमांतरेण कलाद्यं गुण्यम्॥ षष्टिभक्तं कलाद्यम्॥ तत्पूर्वस्थापितफलमध्ये रहितं सहितं कार्यमग्रिमकोष्ठवशात्॥ तन्मन्दफलं भवति इदं यथागतं धनर्णं संपूर्णमध्यमग्रहे देयं समंदः स्पष्टो भवति॥ इदं मन्दफलं पूर्वशीघ्रफलमध्ये धनं चेद्धनम्॥ ऋणं चेदृणं देयम्॥ द्वितीयशीघ्रफलसाधने शीघ्रकेन्द्रं भवति॥ अथवा शीघ्रोच्चं मंदस्पष्टमध्ये शोध्यं शीघ्रकेन्द्रं भवति॥ अस्मात् पूर्ववत् शीघ्रफलं कार्यम्॥ तन्मंदस्पष्टग्रहे देयं स्पष्टग्रहो भवति॥ अथ गतिसाधनम्॥ मंदफलसाधने यन्मंदांकांतरं तेन स्वीया गतीर्गुणयेत्॥ फलं कलाद्यम्॥ तत्स्वगतौ मकरादिमन्दकेन्द्रे ऋणं कर्कादौ धनं कार्यम्॥ सा मंदस्पष्टा गतिर्भवेत्॥ अनेनोना शीघ्रोच्चगतिः शीघ्रगतिर्भवति अन्तिमशीघ्रफलसाधने यच्छीघ्रांकांतरं तेनांतरेण शीघ्रगतिर्गुण्या षष्ट्या भाज्या फलम् अग्रिमकोष्ठकवशान्मंदस्पष्टगतौ धनर्णं कार्यम् सा स्पष्टा गतिर्भवेत्॥ विपरीतशोधनेन वक्रा गतिः॥ उदाहरणम्। भौममध्ये ९। २९। २१। १३ एतस्य शीघ्रोच्चं रविः १। ४। ५७। २४ शोधितः जातं शीघ्रकेन्द्रं ८। २४ २३। ४९ षड्भाधिकं भतश्चक्रात् शोधितम् ३। ५। ३६। ११ अस्यांशाः ९५। ३६। ११ शीघ्रफलं धनं ३४। २२। ३८ अस्यार्धेन १७। ११। १९ संस्कृतो भौमः॥ १०। १६। ३२। ३२ एतन्मध्ये मंदोच्चं ४। १० शोधितं जातं मन्दकेन्द्रं ६। ६। ३२। ३२ मन्दफलं धनं १। २९। ३६ मध्यमभौमे दत्तं जातो मंदस्पष्टो भौमः॥ १०। ०। ५०। ४९। तन्मंद-

फलं प्रथमं शीघ्रकेन्द्रस्य धनं दत्तं जातं द्वितीयशीघ्रकेन्द्रं ८ । २९ । ९२ । २९ । अस्मात् शीघ्रफलं धनं ३३ । १८ । ४९ शीघ्रफलसंस्कृतोमंदफलम् स्पष्टो जातः स्पष्टो भौमः ॥ ११ । ४ । ४९ ३४ मन्दांकांतरेण १४ गतिर्गुणिता ४४० । ४ षष्टिभक्ता फलम् कर्कादिकेन्द्रत्वात् धनम् ॥ ७ । २० अनेन संस्कृता मध्यगतिः ॥ ३१ । २६ जाता मन्दस्पष्टा गतिः ३८ । ४६ अनेनोना शीघ्रोच्चगतिः ५९ । ८ जाता शीघ्रकेन्द्रगतिः २० । २२ इयं शीघ्रांकांतरेण १६ गुणिता ३२५ । ९२ षष्टिभक्ता फलम् ५ । २९ अनेन संस्कृता मन्दस्पष्टा गतिर्जाता स्पष्टा गतिः ॥ ४४ । ११ इति भौमस्पष्टीकरणम् ॥ अथ बुधस्पष्टीकरणम् ॥ शीघ्रकेन्द्रे १० । ३ । १२ । ९२ शीघ्रफलार्धम् ७ । २० । ६ संस्कृतो बुधः १ । १२ । ७ । ३० मन्दोच्चम् ७ । १० रहितं मन्दकेन्द्रं ६ । २ । ७ । ३० मन्दफलं धनं ० । १० । ३६ मध्यग्रहे दत्तं मन्दस्पष्टम् ॥ १ । ९ । ८ । ० तन्मदफलं प्रथमशीघ्रकेन्द्रे दत्तं जात द्वितीयशीघ्रकेन्द्रं १० । ३ । २३ । २८ अस्मात्पुनः शीघ्रफलं धनं १४ । १७ । ९९ मन्दस्पष्टो दत्तं जातस्पष्टो बुधः १ । १९ । २९ । ९९ मन्दांकांतरेण गतिर्गुणिताः २१ । ९ । ४० षष्टिभक्ता फलम् ४ । ९९ मकरादिकेंद्रत्वादृणं मन्दस्पष्टा गतिः ५४ । १३ अनेनोना शीघ्रोच्चगतिर्जाता शीघ्रकेन्द्रतिः १९१ । १९ इय शीघ्रांकांतरेण १३ गुणिता २४८७ । ७ षष्टिभक्ताः फलम् ४१ । २७ अनेन सस्कृता जाता स्पष्टा गतिः ९९ । ४० इति बुधस्पष्टीकरणम् ॥ अथ गुरुस्पष्टीकरणम् ॥ गुरुमध्ये ४ । ७ । १२ । ३७ सूर्यः १ । ४ । ९७ । २४ शोधितः शीघ्रकेन्द्रः ३ । २ । १९ । १३ फलार्धे ऋणं ९ । ४१ । २२ संस्कृतो गुरुः ४ । १ । ३१ । १९ मन्दोच्चेन ९ । २० हीनमन्दकेन्द्रं १० । ११ । ३१ । १९ मन्दफलं धनं ३ । ४३ । २६ । मन्दस्पष्टो गुरुः ४ । १० । ९६ । ३ मन्दफलं प्रथमशीघ्रकेन्द्रे दत्तं जातं द्वितीयं शीघ्रकेंद्रम् ३ । ९ । ९८ । ३९ तत् शीघ्रफलम् ऋणं ११ । २८ । ९८ स्पष्टो गुरुः ३ । २८ । २७ । ३९ मन्दांकांतरेण ३ गतिः ९ निघ्ना १९ षष्टिभक्ता फलं ० । १९ फलम् मकरादित्वादृणम् ४ । ४९ जाता मन्दस्पष्टा गतिः ॥ अनेनोना शीघ्रोच्चगतिः ५९ । ८ जाता शीघ्रकेंद्रगतिः ९४ । २३ इयं शीघ्रांकांतरेण गुणिता ९४ । २३ षष्टिभक्ता फलम् मन्दस्पष्टगतौ

धनं जाता स्पष्टा गतिः ५।३९॥इति गुरुस्पष्टीकरणम्॥ अथ शुक्रस्पष्टीकरणम्॥ शुक्रशीघ्रकेन्द्रं ८ । २४ । ४० । १७ फलार्धमृणं १८ । ५० । ७ संस्कृतः शुक्रः १ । २३ । ४७ । ३१ मन्दोच्चं २ । २० मन्दकेन्द्रं ११ ।३।४७।३१ मन्दफलं धनं ० । ४९ । २९ मन्दः स्पष्टः शुक्रः १ । ५ । ४६ । ४९ शीघ्रकेन्द्रं ८ । २५ । २९ । ४३ शीघ्रफलं धनं ३७ । २४ । ६ स्पष्टः शुक्रः २ । १३ । १० । ५५ मन्दांकांतरं २ मन्दस्पष्टा गतिः ५७ । १० अनेनोना शीघ्रा गतिः ९६ । ८ जाता शीघ्रकेन्द्रगतिः ३८ । ५८ शीघ्रांकांतरं २० शीघ्रगतिफलं धनं १२ । ५९ स्पष्टा गतिः ७०।९ इति शुक्रः ॥ अथ शनिस्पष्टीकरणम् ॥ शीघ्रकेन्द्रं ९ । २९ । ३१ । २७ शीघ्रफलार्धं धनं २ । ४३ । २७ संस्कृतः शनिः ११ । ३ । १२ । १८ मन्दोच्चं७ । २६ मन्दकेन्द्रं ३ । ७ । १२ । १८ मन्दफलम् ऋणं ७ । ३८ । ४६ मन्दः स्पष्टः १० । २२ । ५० । ५ शीघ्रकेन्द्रं ९ । १७ । ५२ । ४१ शीघ्रफलं धनं ५ । ४८ । २२ स्पष्टः शनिः १० । २८ । ३८ । २७ मन्दांकांतरं १ मन्दस्पष्टा गतिः २ । २ शीघ्रकेन्द्रगतिः ५७ । ६ शीघ्रांकांतरं धनं २ । ५१ स्पष्टा गतिः ४।५३ ॥ अथ सौरभोपरि किंचित् स्थूलं रव्यादिग्रहाणां स्पष्टीकरणम्॥तत्रादौ अभीष्टदिवसे उक्तवत् ग्रहवल्ली साध्या । तदुपरि स्वस्वघाटिकायां घटिकादिर्ग्रहः कार्यः॥ तस्य कंद इति संज्ञा कार्या॥तदनंतरं देशान्तरसंस्कारः कार्यः ॥ स यथा ॥ यस्य ग्रहस्य कलात्मकं देशांतरं तत्तद्भक्तं कलात्मकेन पलेन घटिकादिग्रहस्य पलस्थाने धनं चेत्सहितम् ऋणं चेत्तदा रहितं कार्यम् ॥ यस्य विकलात्मकं देशांतरं तत् षड्भक्तं विपलात्मकेन विपलस्थाने सहितरहितं कार्यम् ॥ तदनंतरमन्दबीजसंस्कारः कार्यः ॥ तद्यथा—अंशादिबीजं षड्भिर्भाज्यम् ॥ तेन घटिकादिग्रहः संस्कार्यः ॥ इति आदौ कृत्वा तत्स्पष्टीकरणम् ॥ तत्रादौ रवेस्य सूर्यकन्दस्य घटीतुल्यं रविसौरभस्थं कोष्ठकादधःस्थं घटिकादिफलं ग्राह्यम् ॥ अग्रिमान्तरेण शेषं गुणनीयम्॥षष्टिभाज्यम् । पलात्मकेन पूर्वस्थापितघटिकादिफलस्थाने युतं कार्यम् ॥ अग्रिमस्याधिकत्वात् ॥ एवं कृते घटपादिस्पष्टो रविर्भवति ॥ तदनन्तरं षड्गुणः कार्यः ॥ अंशादिर्भवति ॥ अंशास्त्रिशद्भक्ता राशयो भवन्ति ॥ उदाहरणम्—पूर्वानीते रविकन्दः ५ । ४९ । ४१ । ५४ देशांतरम् ऋणं ७ । ५० संस्कृतः ५ । ४९ । ३४ । ४

पंचकोष्ठकादधःस्थघटिकादिफलम् ९ । १६ । १२ अग्रिमांतरेण ९८ । १७ शेषं ४९ । ३४ । ४ गुणितं २८८८ षष्टिभक्तं फलं ४८ । ८ अनेन घटिकाद्यं ६ । ४ । २० युतं षड्गुणितं जातो राश्यादिस्पष्टोऽर्कः १ । ६ । २६ । ० ॥ अथ गतिसाधनम् ॥ गतगम्यकोष्ठांतरम् एकेनांतरितं कार्यम् ॥ तस्य कलाः कार्याः गतगम्यांतरापेक्षया रूपाधिकत्वे मध्यगतौ रहिता । न्यूने युताः कार्या रवेः स्पष्टा गतिर्भवति ॥ उदाहरणम्—गतगम्यांतरं ० । ९८ । १७ एकेनांतरितं ० । १ । ४२ कलीकृतं गतगम्यांतरापेक्षया रूपाधिकत्वात् ॥ अनेन हीना रविमध्यगतिः ५७ । २९ ॥ अथ चंद्रस्पष्टीकरणम् ॥ ऊर्ध्वांके पंचचत्वारिंशद्युता जाता चंद्रोच्चवल्ली तस्य लता इति संज्ञा कार्या॥तल्लतोपरि चंद्रसौरभोपरि चंद्रसौरभस्य सानुपातघटिकादिफलं ग्राह्यम् ॥ तच्चंद्रकंदेषु योज्यं तदनंतरं षड्गुणितं कार्यं स स्पष्टचन्द्रो भवति ॥ सर्वत्र अनुपाते षष्टिर्भाजकः—उदाहरणम्—लता ४२ । ४१ । ६ । ३७ देशांतरं ० । ९० संस्कृता लता ४२ । ४१ । ९ । ४७ । चंद्रसौरभस्थं द्विचत्वारिंशत्कोष्ठकादधःस्थं सानुपातं घटिकादिफलं ० । ४८ । ९ । २८ चन्द्रकेन्द्रः २९ । २ । १२ । ७ देशांतरं १ । ४१ । २० संस्कृतं ३१ । १० । २६ । ४७ फलेन युक्तः ३९ । २३ । १९ षड्गुणितः स्पष्टचद्रः ७ । ४ । ५६ । १९ ॥ अथ गतिः ॥ द्विचत्वारिंशत्कोष्ठकादधःस्थं सानुपातघटिकादिचंद्रगतेः फलं २ । १४ । २९ षड्गुणं जाताः अंशाः १३।२७।३० षष्ट्या गुणिता स्पष्टा चंद्रगतिः कालाद्या ८०७।३०॥ अथ भौमस्पष्टीकरणम् ॥ भौमकदमध्ये रविकंदः शोध्यः॥ यच्छेषं तस्य लतासंज्ञा कार्या॥ लताया घटीप्रमितकोष्टकादधःस्थं भौमसौरभस्थं सानुपातं घटिकाफलं ग्राह्यम् । तत्फलं भौमकंदेषु योज्यम्॥तदुपकंदसंज्ञकं भवति॥ उपकन्दोपरि उपकंदस्थं सानुपातं घटिकादिफलं ग्राह्यम्॥ तत्फलं भौमकंदमध्ये योज्य सुकंदो भवति ॥ लतामध्ये योज्यं सुलता भवति॥ सुलतोपरि सुलताफलं सानुपातं घट्यादिफलं ग्राह्यम् ॥ तत्फल सुकंदेषु योज्यं तदनंतरं घटिस्थाने दशभी रहितं कार्यम् ॥ तन्मकरंदसंज्ञकं भवति ॥ तदनंतरं षड्गुणितं भौमः स्पष्टो भवति ॥ अनया रीत्या गुरुशन्योः स्पष्टीकरणम् ॥ बुधशुक्रयोः साधितांकचतुष्टययोगे घटिकादिकेन्द्रवल्ली सैव लता ज्ञेया॥ रविकंद एव बुधशुक्रयोः कन्दौ॥अनयोः स्पष्टीकरणम्॥रविकंदः ५।४९।३४।४

भौमकंदः ४९ । ५३ । ३६ । १८ देशांतरं ४ । १० संस्कृतः ४९।५३ । ३२ । ८ एतन्मध्ये रविकंदशोधिता जाता लता ४४ । ३ । ५८ । ४ लतोपरि प्राप्तं सौरमस्थं घटिकादिफलं ४१ । १२ । ७ अग्रिमांतरे ८ । २८ अनुपातफलं ० । ३३ । ३९ अनेन पूर्वं फलं संस्कृतं ४१ । ११ । ३३ । २९ इदं भौमकंदमध्ये युतं जातोपकंदः ३१ । ५ ।-५ । ३३ एतदुपरिप्राप्तम् उपकंदफल सानुपात २ । १४ । ५० । ९ अनेन युक्तो भौमकन्दः जातः सुकंदः ५२ । ८ । २२ । १७ पुनः फलेन युता जाता सुलता ४६ । १८ । ४८ । १३ सुलतोपरि प्राप्तं सुवल्लीफलं १३ । २९ । ४१ । ५५ अनेन सुकन्दो युक्तः ६५ । ४८ । ४ । १२ दशभिर्हीनो जातो मकरंदः ५५ । ४८ । ४ । १२ षड्गुणितः जातो राश्यादिः स्पष्टो भौमः ११ । ४ । ४० । २९ ॥ अथ गतिसाधनम् ॥ भौमस्योपकंदफलयोर्गतगम्ययोरंतरेण गतिर्गुणनीया ॥ तन्मन्दफलं भवति ॥ इदं मध्यगतौ गम्यस्याधिकत्वे युतं न्यूनत्वे ऋणम् ॥ सा मन्दस्पष्टा गतिर्भवति ॥ अनेनोना शीघ्रकेन्द्रगतिः शीघ्रोच्चगतिर्भवति ॥ इय सुवल्ली फलांतरेण गुण्या गतेः शीघ्रफल भवति ॥ तेन फलेन गतैष्याकस्याधिकत्वे मन्दस्पष्टा गतिर्भवति ॥ अनया रीत्या बुधशुक्रशनीनां गतिसाधनं कार्यम् ॥ उदाहरणम्—उपकंदफलयोरंतरं ० । १२ २३ गतिः ३ । २६ गुणिता जात मदफलम् एष्यांकस्याधिकत्वाद्धनं ७ । ० । ४१ अनेन युता मध्यगतिः जाता मदस्पष्टा ३८ । २७ अनेन रहिता शीघ्रोचगतिः ५९ । ८ जाता शीघ्रकेन्द्रगतिः २० । ४१ इय सुवल्ली फलांतरेण ० । १६ । ५५ गुणिता जात शीघ्रगतेः फलम् एष्यांकस्यः हीनत्वाद्धनं५।१९।५२ अनेन युता मंदस्पष्टा गतिः जाता स्पष्टा ४४ । १७॥ अथ बुधस्पष्टीकरणम् ॥ लता ५१ । ३४ । ३२ । ५४ शीघ्रकेन्द्रगतिप्रमाणेन देशांतरं २।२५।२४ संस्कृता ५१ । ३२ । ८ । ३० अनेन बुधकंदः ५ । ४९ । ३४ । ४युतो जातः उपकंदः ५७ । २० । ४२ । ३४ अस्मादुपकंदफल २।१।४६।३९ अनेन कन्दो युक्तः जातः सुकंदः ७ । ५१ । २० । ४३ लतायुता जाता सुलता ५३ । २३ । ५५ । ९ सुवल्लीफलं १० । २३ । ६ । २८ अनेन सुकंदो युक्तः १८।१४।२७।११ दशभिर्हीनो जातो मकरंदः ८।१४।२७।११ षड्गुणितो जातो राश्यादिः स्पष्टो बुधः १ । १९।२६ । ४३ उपकंदफलयो-

रंतरं ० । ५ । ९ धनं मंदस्पष्टा गतिः १४।१२ शीघ्रकेन्द्रगतिः १८।१।११ सुवल्लीफलयोरंतरम् ऋणं ० । १२ । ४७ स्पष्टा गतिः १० २ । ५० ॥ अथ गुरुस्पष्टीकरणम् । रविकंदः ५ । ४९ । ३४ । ४ गुरुकंदः २१।४३। ३१ । ५८ देशांतरं ० । ४० संस्कृतः २१ । ४३ । ३१ । १८ बीजम् ऋणं ० । ३१ । २९ । १० संस्कृतः २१ । १२ । १ । ८ एतन्मध्ये रविकन्दः शोधितः जाता लता १५ । २२ । २२ । ४ सौम्योपरि फलं ३०°। २९ । ४४ । ५१ अनेन गुरुकंदो युक्तः जात उपकंदः ५१ । ४१ । ५० । ५९ उपकंदफलं २ । ३८'। १ । ४९ अनेन कंदो युक्तो जातः सुकंदः २३ । ५० । ७ । ५६ सुलता १८ । ० । ३३ । ५३ सुवल्लीफलं ६ । ५ । १६ । ४४ अनेन सुकंदो युक्तः २९ । ५५ । २४ । ४१ दशहीनो जातो मकरन्दः १९ । ५५ । २४ । ४१ षड्गुणितो राश्यादिस्पष्टो गुरुः ३'। २९ । '३२ । २८ उपकंदफलयोरंतरम् ऋणं ० । ३ । २२ मन्दस्पष्टा गतिः ४ । ४४ शीघ्रकेन्द्रगतिः ५४ । २४ सुवल्लीफलयोरंतरम ऋणं ० । २० । २९ स्पष्टा गतिः ५ । १० ॥ अथ भृगुस्पष्टीकरणम् ॥ शुक्रलता ४३ । १९।२० । १९ देशांतरं ४ । ५० संस्कृता ४३।१९।२५।२९ ॥ बीजं धनं ० । ४७ । ७ । ४० संस्कृता लता ४४ । ६ । ३२ । ९ सौरमस्य फलं ४९ । ३९ । ३३ । ८ अनेन शुक्रकंदो ५ । ४९ । ३४ । ४ युक्तो जात उपकंदः ५५ । २९ । ७ । १२ उपकंदफलं २ । ८ । १४ । २७ सुकंदः ७ । ५७ । ४८ । ३१ सुलता ४६ । १४ । ४७ । ३६ सुवल्लीफलं ४ । १३ । २७ । ५१ अनेन सुकंदो युक्तः ६४ । ४६ । २८ । ० मकरन्दः ५४ । ४६ । २८ । ० षड्गुणः स्पष्टः शनिः १० । २८ । २८ । ४८ उपकंदफलयोरंतरं धनं ० । ० । ४४ मन्दस्पष्टा गतिः ५७ । ७ सुवल्लीफलयोरंतरम् ऋणं ० । ० । २० स्पष्टा गतिः ४ । १४ ॥ अथायनांशसाधनम् ॥ इष्टशकः क्रमाब्धिहीनः कार्यः तदनंतरं स्वदशमांशेन हीनः कार्यः ॥ षष्ट्या भाज्यः ॥ अयनांशा भवन्ति॥ उदाहरणम्—इष्टशकः १५३४ अनेन ४२१ हीनः १११३ अयं द्विष्ठः अस्य दशमांशेन १११ । १८ रहितः १००१ । ४२ षष्टिभक्ता जाता अयनांशाः १६ । ४१।४२॥ अथ दिनमानसाधनम् ॥ स्पष्टः सूर्यः अयनांशयुक्तः कार्यः तस्यांशाः षड्भिर्भाज्या लब्धिकोष्ठकादधःस्थं घट्यादिफलं स्थाप्यम् ॥

तद्दिनमानरूपम् अग्रिमकोष्ठकान्तरेण शेष गुण्यम्॥षड्भक्तानि लब्धानि पलानि। एतानि पूर्वस्थापितदिनमानफलस्थाने अग्रिमकोष्ठकवशात् सहितानि रहितानि, वा कार्याणि। तद्दिनमान भवेत्। उदाहरणम्—सूर्य. १। ६। २६। ० अयनांशैर्युक्त १। २३, ७। ४२ अंशा ५३। ७। ४२ षड्भिर्भक्ता. । फल ८ एततुल्यकोष्ठकस्य दिनमान, ३२। ५४ अग्रिमांतरेण १८ शेष ५। ७। ४२ गुणित ९२। १८। ३६ षड्भिर्भक्त लब्धपलानि १५ एतानि अग्रिमस्याधिकत्वात् पूर्वस्थापितदिनमानपलमध्ये युत जात दिनमान ३३। ९॥ अथ प्रकारांतरेण रवे प्रतिराशिप्रतिराशिप्रत्यंशोपरि दिनमानसाधनम्॥ स्पष्टार्कः स्थाप्य॥ अत्रायनांशसंस्कारो नास्ति। रवेर्यावतो राशयस्तदधो यावतो भागा सन्ति तत्तुल्यराश्यंशसूर्यादध स्थ दिनमान ग्राह्यम्॥ अग्रिमांतरेण गुण्य षष्ट्या भाज्य पलात्मक लब्ध पलस्थाने अग्रिमकोष्ठकवशात् रहितसहित कार्यं तद्दिनमान स्यात्॥ उदाहरणम्—सूर्य १। ६। २६। ० एततुल्यसूर्यादध स्थ दिनमान ३३। ५ अग्रिमांतरेण ३। शेष २६। ० गुणित ७८ षष्ट्या भक्त फलम् १ अनेन संस्कृत जात स्पष्ट दिनमान३३। ६॥अथ चंद्रदर्शनम्। यस्मिन्मासे शुक्लप्रतिपदि चन्द्रदर्शनमवलोक्यते तस्मिन् मासि तद्दिने सूर्यो यद्राशावस्ति तद्राशिस्थः सूर्यस्तिर्यक्पङ्क्तौ यस्मिन् कोष्ठके भवति स कोष्ठको ग्राह्य। तदनंतर यस्मिन् राशौ राहुरस्ति तद्राशिस्थो राहु ऊर्ध्वपङ्क्तौ यस्मिन् कोष्ठके भवति तत्कोष्ठकादधस्तात् सर्वकोष्ठकाभिमुखी घटी ग्राह्या॥ तदनंतरम् अमावास्याया विद्यमानघटिकास्ता षष्टिकामध्ये शोध्या तदनंतर यच्छेष भवति तद्दिनज दिनमान तन्मध्ये योज्यम्। एव कृते या घटिका भवति ताः पूर्वस्थापितघट्य्भ्यश्चेदधिकास्तदा प्रतिपदि चंद्रो दृश्य॥ न्यूने अदृश्य॥ किंतु द्वितीयायां दृश्य॥ उदाहरणम्—सूर्य ४। २० राहु १०। २ अत्र रवि ५ सिंहे कुंभे राहु॥ अनयो प्राप्तघटी ८२ अमावास्याघटिका १। ४० षष्टिमध्ये शोधिता ५८। २० शेष दिनमानेन युक्त ३१। २४ जाता ८९।४४ एता भाग्य ८२ अधिका अतोऽत्र प्रतिपद्येव चन्द्रदर्शनम्॥ अथ भौमादीनां वक्रमार्गोदयास्तसाधनम्। अतिमशीघ्रफलसाधने यच्छीघ्रकेन्द्र तस्य धनशुद्धस्यांशा कार्या प्रोक्तांशानां इष्टांशानां च साम्ये तस्मिन्नेव दिने वक्रादिक स्यात्। न्यूनाधिके तद्दिवसानयनम्॥ प्रोक्तेष्टांशानामतरकला कार्या.

शीघ्रकेंद्रगत्या भाज्याः ॥ लब्धं दिनघटीपलाद्यं ग्राह्यं प्रोक्तांशेभ्य इष्टकेंद्रांशा अधिकास्तदा लब्धेन अवधिस्थं वारादिकं रहितं कार्यम् ॥ न्यूनेन सहितं कार्यम् ॥ तद्वारघटीपलेषु वक्राद्यं स्यात् ॥ अस्तोदयाविति दिवाकरपद्यम् ॥ अथ भौमादीनां चरणगतिसाधनम् । भपादेति दिवाकरपद्यम् ॥ वैशाखशुक्ल ९ शनाववधिस्थो भौमः ३ । २६ । १ । ३९ आश्लेषाचतुर्थचरणे भौमः ३ । २६ । ४० अनयोरंतरं कलाः ३८ । २१ अवधिस्थभौमगत्या १९। २३ भक्ताः फलं दिनादिकं १ । ५८ । ११ इदमवधिस्थ-वारादौ ० । ४६ । ३४ युतं २ । ४४ । ४५ भपादजं भौमात् अवधिस्तस्य न्यूनत्वात् ॥ एवं वैशाखशुक्लसप्तम्यां सोमे सूर्योदयाद्गतघटीषु ४४ पलेषु ४५ तदाश्लेषाचतुर्थपादे भौमः ॥ अथ चंद्रग्रहणम् ॥ पूर्णिमांते यद्विद्यमान-नक्षत्रं तस्य गतैष्यवटिकायोगः कार्यः तत्तुल्यघटिकाधःस्थं चंद्रबिंबपातबिंबं नाम भूमाबिंबं ग्राह्यम्॥ अग्रिमांतरेण शेषफलादिगुण्यानि॥ षष्ट्या भक्तेन लब्धां-गुलैरग्रिमकोष्टकवशात् सहितरहितानि कार्याणि ॥ अंगुलात्मकं चंद्रबिंबं भूमा-बिंबं च भवति ॥ अथ भूमायाः संस्कारः ॥ पौर्णमास्यां यद्राशौ सूर्यसंक्रांति-रस्ति तद्राश्यधःस्थमंगुलादिकं पातफलं स्थाप्यम् ॥ अग्रिमांतरेण सूर्यस्य भागाद्यं गुण्यम् ॥त्रिंशता भाज्यं व्यंगुलात्मकफलेन अग्रिमकोष्टकवशाद्धीनान्वितं कार्यम्॥ अनेन भूमायुता कार्या ॥ सा स्पष्टा भवति॥ पातफलं सदा धनं तदनंतरं रवि-चंद्रयोर्बिंबयोर्योगार्धं कार्यम्॥ तन्मानैक्यखंडं भवति ॥ तत् शरोन कार्यं ग्रासो भवति ॥ उदाहरणम्-शकः १९३४ वैशाखशुद्ध१५ सोमे घटी ५४। ४० अनुराधानक्षत्रस्य गतैष्ययोगः ५८ । ३६ सूर्यः १ । ६ । २० । ३७ चंद्रः ७ । ६ । ३४ । ३९ राहुः १ । १४ । १८ । ११ अष्टपंचाशद्घटिकाधःस्थं चंद्र-बिंबं ११ । १० अग्रिमांतरेण ११ शेषं गुणितं ३९६ षष्ट्या भक्तं फलेन संस्कृतं जातं चंद्रबिंबं ११ । ४ भूमाबिंबं २८ । १६ अनुपातफलेन२२संस्कृतः २७ । ५४ वृषसंक्रांत्यध:स्थं फलं० । ३१ अग्रिमांतरेण ६ । शेषं गुणितं ३४ । २७ जातं ३९ त्रिंशद्भक्तं फलेन १ संस्कृतं० । ३२ अनेन भूमायुता जाता स्पष्टा भूमा२८ । २६ अनयोर्योगार्धं जातं मानैक्यखंडं १९ । ४५ ॥ अथ शरसाधनम् ॥ पर्वांतकालीनःसपातश्चंद्रः कार्यः अथवा विराहुश्चन्द्रःकार्यः॥ षड्धिकश्चेद्भगणाद्विशोध्यः ॥ न्यूनो यथास्थित एव ॥ तस्यांशाः कार्याः षड्भि

भक्ताः कार्याः लब्धप्रमितकोष्ठकस्थः अंगुलाद्यः शरो ग्राह्यः ॥ अग्रिमांतरेण शेषं गुण्यं षड्भक्तं लब्धांगुलैः संस्कार्यः अंगुलात्मकः शरो भवति ॥ उदाहरणम् ॥ विराड्ध्रुवश्चन्द्रः तस्यांशाः १७।२। १६।२४ षड्भक्ताः फलं २८ । १८। ४३ शरः अनुपातफलेन ६ । २७ संस्कृता जाताः शरोऽङ्गुलादिः १२ । ६ अनेन रहितं मानैक्यखंडं जातो ग्रासः७।३९। अथ स्थित्यानयनम्॥ग्रासस्यांगुलप्रमित-कोष्ठकादधःस्था स्थितिः स्थाप्या अग्रिमांतरेण अंगुलानि गुण्यानि षष्टिभक्त-लब्धपलैः सहिताः कार्याः घटिकादिस्थितिः स्यात् ॥ उदाहरणम्--ग्रासः७ । ३९ स्थितिः ३ । ३९ अनुपातफलेन ७ सहिता जाता घटिकादिस्थितिः॥ ३।४२ अन्यदवशिष्टकरणोक्तरीत्या साध्यम् ॥ इति चंद्रग्रहणम् ॥ अथ सूर्यग्रहणम् ॥ शकः १९३२ मार्गशीर्षकृष्णे ३० बुधे घटी ११।१९ सूर्यः ८।९।२६।२० लग्न ११ । २।१।३४ त्रिभोनम् अमावास्या यत्संक्रांतौ भवति तत्संक्रांतिराश्यधः स्थसूर्यबिंबं स्थाप्यम् ॥ अग्रिमांतरेण सूर्यस्य भागाद्य गुण्यं त्रिंशद्भक्तं अंगुला-त्मकं फले अग्रिमकोष्ठकवशाद्धीनान्वितं कार्यम् ॥ अंगुलाद्यं सूर्यबिम्बं भवति ॥ उदाहरणम्--धनूराशौ सूर्यबिम्बं ११ । ४४ आयातत्र्यंगुलैः संस्कृतञ्जातं रवि-बिम्ब ११।२४॥ अथ लंबनम्॥ त्रिभोनलग्नक्रान्तिरंशाः ते यथा राशित्रयात्मा भवन्ति तथा कार्याः ॥ तदनंतरं षड्भिर्भाज्याः लब्धप्रमितपञ्चदशावःस्थघटि-कादिलंबन ग्राह्यम् । अग्रिमांतरेण शेषं गुण्यं षड्भिर्भाज्यं लब्धपलैः सहितं घटिकादिलंबनं स्यात् ॥ सर्वात् त्रिभोनलग्नेऽधिके सति धनं न्यूने ऋणं ज्ञेयम्॥ उदाहरणम्--त्रिभोनलग्नक्रांतरंशाः ॥ ३ । २० । ४६ । षड्भिर्लब्धं शून्य, शून्यादधःस्थ घटिकादिल बनं ०।०।० अग्रिमांतरेण २४।२९ शेषं३।२०।४६ गुणित ८१ । ४२ । ३ षड्भिर्भक्तलब्धं पलादिकैः १३ । ९८ सहितं जातं घटिकादिलबनं ०।१४ अन्यदवशिष्टं पूर्ववत्॥ एतत्पंचदशकोष्ठकस्थलंबनस्थांको-परि ग्रहणं स्थूलं क्रान्तिसाधनमाह ॥ सायनग्रहस्य भुजांशाः कार्याः ॥ षड्भि-र्भाज्याः लब्धप्रमितकोष्ठकस्या घटिकाद्या क्रान्तिः स्थाप्या । लम्बनवदनुपातः कार्यः॥तदनंतरं षड्गुणिताः कार्याः भागादिक्रान्तिः स्यात् ॥ उदाहरणम्॥ सूर्यः ८। ९। २६।२० अयनांशाः १६ । ३९। ९४ सायनः सूर्यः ८।२२ । ६। अस्य भुजांशाः८२ ।६ । १४ षड्भक्ताः लब्धं १३ घटिकादिक्रान्तिः३।९४।२६ पलात्मकेनानुपातेन २ । ९४ सहिता ३।९७।२० षड्गुणिता जाता भागाद्या क्रान्तिः २३। ४४ ग्रन्थकर्त्रा एते पंचदशकोष्ठकस्या लंबनस्थांकाः अन्ये पंचदश

कोष्ठेषु विपरीताः स्थापिताः ॥ एवं त्रिंशत्कोष्टेषु क्रान्त्यंका जाताः ॥ अस्यो परि क्रान्तिसाधनम् ॥ सायनग्रहः षड्भाधिकश्चेच्चक्राद्विशोध्यः। तस्यांशाः कार्याः षड्भिर्भाज्याः लब्धकोष्ठकस्था घटिकादिक्रान्तिः ॥ पूर्ववत्सानुपातात् ग्राह्याः अत्रानुपातफलम् अग्रिमकोष्ठवशाद्धीनान्वितङ्कार्यम् । इयं क्रान्तिः पूर्वेण सह तुल्या॥ उदाहरणम्–सायनसूर्यः ८। २२। ६। १४ भगण १२ च्युता ३।७। ५३।४६ अंशाः ९७।५३।४६ षड्भक्ताः फलं १६ क्रान्तिः २। ५८।३६ अनुपातफलेन १।१६ रहिता षड्गुणिता सैव क्रान्तिः २३।४४॥ अथ सूक्ष्मक्रान्तिसाधनम्॥ सायनग्रहस्य भुजांशप्रमितकोष्ठकस्था भागाद्या क्रान्तिः स्थाप्या ॥ अग्रिमांतरेण कलाद्यं गुण्यं षष्ट्या भागेन कलात्मकेन फलेन सहितं कार्यं भागाद्या क्रांतिः स्यात् २३। ४४। ५८ ॥ अथ शरसाधनम् ॥ सपात-चन्द्रस्य अथवा विराहुचन्द्रस्य भुजांशप्रमितकोष्ठकस्थः कलादिः शरो ग्राह्यः । अग्रिमांतरेण शेषं गुण्यं षष्ट्या भाज्यं विकलात्मकेन फलेन सहितं कार्यं कलादिवाणः स्यात् । त्रिभिर्भाज्योंगुलादिः स्यात् ॥ उदाहरणम्–विराहु-चन्द्रस्य भुजांशाः ७। ४३। ४६ शरः ३३। ५२ अनुपातफलेन ३। २४ सहितो जातः कलादिः शरः ३६। १६ त्रिभिर्भक्तो जातोंगुलाद्यः शरः १२। ५ ॥ अथोन्नतांशोपरि द्वादशांगुलशंकोश्छायासाधनम् ॥ उन्नतांशप्रमित-कोष्ठाधःस्थांङ्काः स्थाप्या अग्रिमांतरेण शेषं गुण्यं षष्ट्या भाज्यं फलेनाग्रिमकोष्ठक-वशात्सहितं रहितं कार्यम् ॥ छाया भवति ॥ अथाश्विन्यादीनां नक्षत्राणाम् उदय मध्यास्तलग्नज्ञानम् ॥ अश्विन्युदये मेषलग्नराश्यादि०।१।२६।५ रवेर्मध्यस्थितकर्क-लग्नं रव्यादि ॥ ३।१४। ३६ अस्तमये तुलालग्नं राश्यादि ६। १२। ५८ एवं भरण्यादिषु ज्ञेयम् ॥ इति विश्वनाथविरचितं मकरन्दस्योदाहरणम् ॥

अथ संवत्सराद्यानयनम् । तत्रादौ संवत्सरानयनमाह—

शकाक्षेन्दु १५१४ वियुक् शको नग ७ गुणः शून्यांबरांगोद्धृतो ६००
भाग्यं लब्धमिताब्दवेददहनाढ्यं ३४ सांब्दभूपेन्दुतः ॥
दिग्भागाः सकलाः युतं प्रभवतोऽब्दाः षष्टिशेषाः स्मृताः
शेषांशा रविभिर्हता दिनमुखे मेषार्कतः प्राग्भवेत् ॥ १ ॥

उदाहरणम्–शकः १५५६ अनेन १५१४ रहितः जाता गताब्दाः ४२ सप्तभिर्गुणिताः २९४ शून्यांबरांगो ६०० हृतः फलं राश्यादि ०।१४।४२।०

राशिस्थाने गताब्दः ४२वेददहनाभ्यां युतः ७६ । १४ । ४२ । ०.गताब्दयुतभूपे द्रुतः १६८ दिग्भागाः १० सकला १६।४८ युतं ७९ । १४ । ९७ । ४८ ऊर्ध्वांकः षष्ट्या तष्टः शेषांकः १६ गतवत्सरो ज्ञेयः वर्तमानः सुभानुसंवत्सरः शेषं १४ । ९७ । ४८ द्वादशभिर्गुणितं जातं दिनादिकं १७९ ।३३ । ३६ दिनस्थाने त्रिंशद्भक्तं जातं मासादिकं ५ । २९ । ३३ । ३६ एभिर्मासादिकैर्वर्तमानवर्षस्थमेषसंक्रांतिसकाशात् पूर्वप्रवृत्तः। सुभानुवत्सरः इदं द्वादशामध्ये शोधिते शेष ६ । ० । २६ । २४ एवं वर्तमानतुलांशकः ०।२६ । २४ यावत्सुभानुवत्सरः । तदनन्तरं तारणाख्यः॥ एवं वर्षमध्ये द्वयोः फलं लेख्यम्॥ दाक्षिणात्याः नर्मदायाः दक्षिणे भागे मनुमानेन संवत्सरप्रवृत्तिमाहुः ॥ उक्तं च—नर्मदोत्तरभागे स्याद्गुरुमानेन वत्सरः ॥ नर्मदायाम्यभागे तु मनुमानाद् बुधैः स्मृतः ॥ तदानयनम्—शालिवाहनशाकोऽर्कसंयुतः ,षष्टिहृत् प्रभवपूर्ववत्सरानुमानेन ॥ अथ गुरूदयात् गुरुवर्षज्ञानमाह । स्यादूर्जादिषु मासेषु वह्निमादि द्वयं द्वयम् । उपांत्यपंचमांत्येषु नक्षत्राणां त्रयं त्रयम् ॥ यस्मिन्नभ्युदितो जीवस्तन्नक्षत्राख्यवत्सरः ॥ तद्यथा—यस्मिन्समये गुरोरुदयः तस्मिन् समये यस्मिन् नक्षत्रे गुरुस्तिष्ठति तन्नक्षत्रस्य यो मासः स गुरुवर्षसंज्ञको ज्ञेयः॥कृत्तिकारोहिणीस्थितो गुरुः सूर्यसान्निध्यादुदयं प्राप्तस्तदा कार्त्तिकसंज्ञकं गुरुवर्षं ज्ञेयम्॥ मृगार्द्रयोः मार्गशीर्ष० ॥ पुनर्वसुपुष्ययोः पौष० ॥ आश्लेषामघयोर्माघा० ॥ पूर्वोत्तराहस्तेषु फाल्गुन० ॥ चित्रास्वात्योश्चैत्र० ॥ विशाखानुराधयोर्वैशाखं० ॥ ज्येष्ठामूलयोर्ज्येष्ठसंज्ञं० ॥ पूर्वोत्तराषाढयोराषाढं० ॥ हरिवासवयोः श्रावण० ॥ शततारकापूर्वाभाद्रपदोत्तराभाद्रपदासु भाद्र० ॥ अन्त्यदास्रयमानामाश्विनसं० ॥ तत्र पंचमः फाल्गुनः, अंत्य आश्विनः, उपांत्यो भाद्रपदस्तेषु प्रत्येकं नक्षत्रत्रययोगो ज्ञातव्यः ॥ सूर्यसिद्धांतवचनादस्तमयनक्षत्रादपि गुरुवर्षं ज्ञेयमिति ॥ अत्रास्तमयोदयनक्षत्रमेकमेव बाहुल्यो न भवति । तथापि कदाचिद्विसंवादे उदयास्तभादिति उभयनक्षत्रोपादानादुभययुतानि मिश्रीभावेन वक्तव्यानि ॥ गुरूदयदिनमारभ्योप क्रम इत्यहर्गणः ॥ प्रशंसति सहर्क्षेण सहितो युगपद्गुरुः ॥ तस्मात्कालादहस्यः स्यात्पूर्वश्चाब्दः प्रवर्तते ॥ ऋक्षपूर्व इति वचनात् । कार्त्तिकादयो गुरूदयादब्दा उदितदिवसात् ॥ प्रभवादयस्तु मध्यमगुरुराशिभोगादिति विवेकः। बहुसंमतत्वात्॥ गुरूदयाद्गुरोरब्दविचारणात् कर्तव्येत्यर्थः ॥ गुर्वब्दफलं गुरूदयादग्रिमगुरूदय-

पर्यन्तं ज्ञेयम् । यस्मिन्वर्षे गुरूदयं पुनर्वसुनक्षत्रे गुरुस्तिष्ठति इतिकारणात् इदं पौषसंज्ञकं गुरुवर्षम् । तस्यफलं लेख्यम् ॥ अथ राजादिनिर्णयः ॥ चैत्रादिमेषादि-कुलीरतौलिमृगाख्यमार्द्राधनुरादि वाराः । राजा चमू सस्यरसाधिपाश्च स्युर्नीरसे-शाम्बुधिधान्यनाथाः ॥ १ ॥ प्रतिपदि यदि चैत्रे शुक्लपक्षे भवेतां कथमपि यदि वारौ द्वौ तदा भूपतिः कः । प्रथमदिवसवारः कीर्तितो गर्गमुख्यैर्गुणवति सति डिंभे राज्यभाग् ज्येष्ठ एव ॥ २ ॥ डिंभो बालः ॥ "पोतः पाकोऽर्भको डिंभः" इत्यभिधानात् ॥ कांबोजादिदेशेषु विशेष उक्तः ॥ कांबोजखार्जूरकिरातसिंधु-देशेषु विल्वेष्वपि दर्दुरेषु । किंत्वग्रमध्याह्नगतोऽब्दपः स्यादन्येषु सूर्योदयगो दिनेशः ॥ अन्यच्च—प्रतिपद्दर्शसंधिश्च मध्याह्नात्पूर्वतो यदि ॥ तदा तद्दिनपो राजा परतश्चेत्परो भवेत् ॥ अत्र केचिच्चांद्रवर्षस्य प्रतिपदादितो दक्षिणे वर्षे प्रवेशात् तत्रत्य एव वारो वर्षेश इत्याहुः । पठंति च—फाल्गुनांते कुहू राजेति ॥ तदे-तद्गुर्जरदेशे प्राचुर्येण वर्तते ॥ दाक्षिणात्या औदयिकप्रतिपद्वारमेव राजान-माहुः ॥ कश्यपः—चैत्रशुक्लाद्यदिवसे किंस्तुघ्ने बवकेऽथवा ॥ अर्कोदये तु यो वारः सोऽब्दपः परिकीर्तितः ॥ चैत्रशुक्लप्रतिपद्दिवसे यो वारः स राजा ॥ मेष-संक्रांतिदिवसे यो वारः स मंत्री ॥ कर्कसंक्रांतिदिवसे यो वारः स सस्या-धिप. ॥ तुलासंक्रांतिदिवसे यो वारः स रसाधिपः ॥ मृगसक्रांतिदिवसे यो वारः स नीरसाधिपः॥ आर्द्राप्रवेशदिवसे यो वारः स मेघाधिपः॥ धनुःसंक्रांति-दिवसे यो वारः स पश्चिमधान्याधिपः ॥ एतेषां फलानि क्रमतो लेख्यानि ॥ तदनंतरं यस्यां तिथौ यस्मिन्वारे यस्मिन्नक्षत्रे यस्मिन्योगे आर्द्राप्रवेशस्तत्फलानि लेख्यानि ॥ दिवारात्रौ वा प्रवेशात्तत्फलं लेख्यम् ॥ अथ नवमेघानयनम् ॥ गताब्दा नवभिस्तष्टाः शेषं हाराद्विशोधयेत् । ततश्चावर्तसंवर्तद्रोणपुष्करकीलकाः । नीलश्च वरुणो वायुस्तमो मेघाः स्मृता नव ॥ अत्र गताब्दानयनम् ॥ युग्म-चन्द्रशरचद्रविहीनाः शालिवाहनशकात् गताः समाः ॥ उदाहरणम्—शकः १९९६ अनेन १५१२ रहिता जाता गताब्दाः ४४ नवभिस्तष्टाः शेष ८ हारात् शोधितं १ आवर्तसंज्ञको मेघः । तत्फलं लेख्यम् ॥ केचित्तु मेघचतुष्टयमाहुः— तदानयनं च । त्रिभिर्गताब्दाः सहिताश्चतुर्भिः शेषं भवेदंबुपतिः क्रमेण। आवर्तसंवर्तक पुष्कराश्च द्रोणश्चतुर्थो मुनिभिः प्रदिष्टः । अत्रापि पूर्ववद्गताब्दानयनम् ॥ आवर्ते छिन्नवृष्टिः स्यात्संवर्ते जलपूरिता । पुष्करे मन्दवृष्टिः स्यात् द्रोणो वर्षति सर्वदा ॥

अथ द्वादशनागानयनम् ॥ गताब्दा द्वियुताः सूर्यभक्तास्तत्रावशेषिताः। सबुद्धो नंदसारी च कर्कोटकः पृथुश्रवाः ॥ वासुकिस्तक्षकश्चैव कंबलाश्वतरावुभौ ॥ हेममाली नरेन्द्रश्च वज्रदंष्ट्रो वृषस्तथा॥ अत्रापि पूर्ववद्गताब्दा ज्ञेयाः॥ उदाहरणम्—गताब्दाः ४४ द्वियुता ४६ द्वादशभिस्तष्टाः शेषं १० नरेन्द्रसंज्ञको नागः। तत्फलम्॥ केचित्तु नागाष्टकमाहुः तदानयनम्—शाको रसाद्रिसंयुक्तो वसुभिर्भाग-शेषतः ॥ अनन्तादिक्रमेणैव अष्टौ नागाः प्रकीर्तिताः ॥ अनन्तो वासुकिः पद्मो महापद्मः सुतक्षकः। कुलीरः कर्कटः शङ्खश्चाष्टौ नागाः प्रकीर्तिताः ॥ अथ सप्तवातानयनम् ॥ शाकः शशांकसंयुक्तो मुनिभिर्भागहारितः। आवहादि-क्रमेणैव सप्त वाताः प्रकीर्तिताः ॥ आवहः प्रवहश्चैव संवहो विवहस्तथा। उद्वहोऽतिवहश्चैव सप्त वाताः प्रकीर्तिताः॥ अथ वर्षादीनामानयनम् ॥ महादेवः—शाकस्त्रिगुण्यो नगभाजितश्च शेषं द्विनिघ्नं शरसंयुतं च। लब्धं च शाकश्च पुनः प्रकल्प्य पूर्वोक्तवत्स्युः खलु विश्वकाख्याः ॥ वर्षा च धान्यं तृणशीततेजो-वायुश्च वृद्धिक्षयविग्रहाश्च ॥ एवं नवाभिहितानि ॥ उदाहरणम्—शाकः १९९६ त्रिगुणः ५९८८ सप्तभक्तः लब्धं ८५५ शेषं ३ द्विगुणं ६ शर ५ संयुतः ११ एते जाता विश्वकाख्या वर्षा ११ लब्धं ८५५ त्रिभिर्गुणितं २५६५ सप्तभक्तं ३६६ शेषं ३ द्विनिघ्नं ६ शर ५ युत जात धान्यं ११ एवं लब्धोपरि सर्वत्र ज्ञेयम्॥ तृण ७ शीतं ९ तेज. ९ वायुः ११ वृद्धिः १७ क्षयः ९ विग्रहः ११ ॥ शाकश्च वेदगुणित सप्तभिर्भागमाहरेत्। शेषं द्वित्र निभि-र्युक्तं प्रोक्तं विश्वाख्यसंज्ञकम्॥ क्षुधा तृषा तथा निद्रा चालस्य चोद्यमस्तथा॥ शान्तिः क्रोधस्तथा दम्भो लोभो मैथुनमेव च ॥ ततस्तु रसनिष्पत्तिः फल निष्पत्तिरेव च ॥ उत्साहः सर्वलोकाना ज्ञातव्य निश्चित बुधैः ॥ त्रयोदशोदा-हरणम्—शाकः १९९६ चतुर्गुणिताः ७९८४। सप्तभक्ताः लब्ध ११४०

शेष ४ द्विघ्न ८ त्रियुतं ११ जाता क्षुधा ॥ पुनर्लब्ध ११४० चतुर्गुणं ४५६० सप्त ७ भक्त लब्धं ६५१ शेष३ त्रियुत तृषा९ ॥ एव लब्धोपरि सर्वत्र ज्ञेयम्। निद्रा ७, आलस्य १३ उद्यमः ७, शांतिः १३, क्रोधः ७ दम्भः ९ लोभः१३ मैथुनं १९ रसोत्पत्तिः १९ फलानि ९ उत्साहः ११ ॥ शकाब्दं वसुभि-र्निघ्नं नवभिर्भागमाहरेत्। शेषं तु द्विगुणीकृत्य रूपमत्रापि योजयेत् ॥ उग्रं पापं च पुण्यं च व्याधिं व्याधिविनाशनम्। आचारश्चाप्यनाचारो मरणं जनिरेव

च ॥ देशस्योपद्रवः स्वास्थ्यं चौराकुलमयं तथा ॥ अथैषां पञ्चदशानामुदाहरणम्—शकः १५९६ अष्टगुणः १२४४८ नवभिर्भक्तः लब्धं १३८३ शेषं १ द्विनिघ्नं २ रूपं १ योज्यं ३ जातम् उग्रं ३ एवं लब्धोपरि सर्वत्र ज्ञेयम् ॥ उग्रं पापमित्यादिना अग्निनाशपर्यंतं पंचदश ज्ञेयाः ॥ शकः पञ्चभिः सप्तभिर्गोभिरीशैश्चतुर्धा हतः सप्तभक्तावशिष्टः । द्विनिघ्नं त्रिभिर्युक्तमुद्भिज्जराय्व ण्डजस्वेदजानां हि विंशोपकाः स्युः ॥ उदाहरणम्—शकः १५९६ चतुर्धा स्थाप्यः १५९६ क्रमेण गुणकैर्गुणितः ७७८० । १०८९२ । १४००४ । १७११६ सर्वत्र सप्तभक्ते शेषाणि ३ । ० । ४ । १ द्विगुणितानि ६ । ० ८ । २ त्रिभिर्युक्तानि जाता विंशोपकाः । ९ । ३ । ११ । ५ उद्भिज्जाः ९ जरायुजाः ३ अडजाः ११ स्वेदजाः ५ । एतत्स्वरूपं अमरसिंहेनोक्तम्—"उद्भिज्जास्तरुगुल्माद्याः पक्षिसर्पाद्योऽण्डजाः । स्वेदजाः क्रमिदंशाद्या नृगवाद्या जरायुजाः " ॥ अथ रोहिणीचक्रम् । मेषार्कदिनमाॠक्षद्वयमब्धौ द्वयं तटे । एकं गिरौ द्वय सधौ चतुर्दिक्षु तथा न्यसेत् ॥ साभिजिच्च क्रमेणैव फल यत्र तु रोहिणी ॥ अतिवृष्टिः समुद्रे स्यात् तटे वृष्टेरवर्षणम् ॥ गिरौ सधौ खंडवृष्टिरित्याहुः पूर्वसूरयः ॥ अथाब्दपानयनम् । भूनदतिथ्यूनशका हता भू १ स्तिथ्यः १५ कुरामा ३१ कुगुणा ३१ श्च सिद्धाः २४ ॥ भुवा १ खबाणै५० स्त्रिशरै ५३ श्च युक्तास्तष्टा नगीरर्कमुखोऽब्दपः स्यात् ॥ १ ॥ अथ ग्रहाणामायव्ययाः ॥ षट्सूर्ये तियथश्चंद्रे छष्टौ भूमिजके तथा । सप्त दशेंदुबुधे च दश भास्कर-नन्दने ॥ एकोनविंशतिर्जीवे राहौ द्वादशकं भवेत् ॥ एकविंशतिराख्यास्याच्छुक्र स्यापि तथैव च ॥ अथायव्ययानयनम् ॥ स्वस्वामिवर्षाधिपवत्सरैक्यं त्रिघ्नं शराढ्य तिथिभक्तशेषम् । आयोऽथ लब्धिस्त्रिगुणा शराढ्या तिथ्युद्धृता शेषमितो व्ययः स्यात् ॥ स्वस्वामिशब्देन द्वादशराशिस्वामिनः । वर्षाधिपशब्देन राजा अनयोर्वर्षमिति ॥ उदाहरणम्—मेषस्वामी भौमः तस्य वर्षाणि ८ । राजा बुधः तस्य वर्षाणि १७ अनयोर्योगः २५ त्रिभिर्गुणितः ७५ पंचभिर्युक्तः ८० तिथि १५ भक्तः शेष ५ एतन्मितौ मेषराशौ भवतः लब्धं ५ त्रिगुणं १५ पंचयुक्त २० तिथिभक्तं शेषं ५ मेषराशौ व्ययः ५ एवं वृषादीनामायव्ययाः ॥ प्रतिवर्षं यो राजा भवति तस्यैवायव्ययौ ज्ञेयौ सिद्धिवत् ॥

इति श्रीदिवाकरदैवज्ञात्मजविश्वनाथदैवज्ञविरचिता
मकरन्दोदाहृतिः समाप्तिमगमत् ॥

॥ श्रीगणेशाय नमः ॥

मकरन्दसारिणी-भाषा ।

सोपपत्ति सोदाहरण ।

श्रीमकरन्दसारिणीकी उपपत्तिसहित क्रम और उदाहरण भाषामें क्षेपक सहित सरलतापूर्वक इस ग्रन्थमें लिखा जानेसे प्रथम मकरन्दसारिणीके कर्ता श्रीमान् पं० विश्वनाथ दैवज्ञजीकी बुद्धिको कोटिशः धन्यवाद देता हूं। क्योंकि, इसकी उपपत्ति जाननेपर ऐसा प्रत्यक्ष ज्ञात होजावेगा कि मध्यमादि ग्रहोंके शीघ्र बनानेमें इससे और सरलता करना बहुतही कठिन असम्भवसा है, मध्यग्रह बनानेमें जो वाटिका बनाई है वह बहुतही सरल और सदैवके लिये शुद्धगणित रूपमें सिद्ध होती है जो कि वाटिकाकी उपपत्तिमे पाठकगण जानकर खुश होंगे।

मकरन्दसारिणीका आरम्भ कलियुगके आरम्भसे वैशाख शु. १ भृगुवारसे होता है। क्योंकि, वैशाख कृ० १३ भौमे सूर्यकी संक्रांति हुई है और उस वर्ष जेष्ठमास अधिक हुवा था जो कि गणितसे जाचकर लिखा है इसीलिये मकरन्दके अहर्गण (ग्रह दिनवल्लीके दिनों) की गणना शुक्रवारसे होती है।

अब मकरन्दसारिणीका क्रम समयोचित लिखा जाता है—

प्रथम तिथि नक्षत्र योग करण मध्यम तथा स्पष्ट करनेका क्रम लिखते है-यह समझना चाहिये तिथि नक्षत्र व योग क्या है? (उत्तर-) सूर्य चन्द्रमाका जो अन्तर है वह ही तिथि है अमावस्याके अंतमें सूर्य चन्द्रमाकी राश्यादिमें समानता होती है फिर शुक्र प्रतिपदासे चन्द्रमा सूर्य १२ अंश प्रतितिथि आगे होता जाता है. तिथिके अंत समयमें जानना और पूर्णिमाके अन्तमें ६ राशि अधिक चन्द्रमा हो जाया

करता है यह तिथिका सिद्धांत है। अब चन्द्रमा जो है वहही नक्षत्र है और सूर्य चन्द्रमाकी राश्यादिका योग है वहही योग है और १ तिथिमें २ करण भोग करते हैं कृष्णपक्षकी चतुर्दशी १४ के उत्तरार्द्धसे शुक्लपक्षकी प्रतिपदाके पूर्वार्द्धतक ४ करण शकुनी चतुष्पद नाग किंस्तुघ्न क्रमानुसार भोग करते हैं। फिर शुक्ल प्रतिपदाके उत्तरार्द्धसे क्रमानुसार तिथ्यार्द्ध प्रति १ भोग करता है। नाम यह है–१ बव २ बालव ३ कौलव ४ तैतल ५ गर ६ वणिज्य ७ विष्टी (भद्रा) यह सातों करण भोग किया करते हैं, जो विष्टी करण है वहही भद्रा मकरन्दसारिणीमें जो तिथि नक्षत्र योग बनाये गये हैं वह मध्यम है सूर्यचन्द्रसे बनाकर फिर केन्द्रांशोद्वारा फल (सौरभ) बनाकर तिथ्यादि स्पष्ट की गई हैं। तिथिसौरभ इत्यादिमें फल सदैव धन करते हैं लेकिन सूर्य चन्द्र स्पष्ट करनेपर केन्द्र भुजांशोद्वारा मेषादौ तुलादौ वशात् धन ऋण दोनों संस्कार किये जाते हैं यह शंका उत्पन्न होती है। जिसका समाधान यह है कि, मध्यम सूर्य व मध्यम चन्द्रसे मध्यम तिथि बनाकर उसमें कुछ घटी १४ या १५ के निकट घटाकर सारिणीमें मध्यम तिथिकी घटिकादि रक्खी हैं जो बनाकर देखनेसे मालूम हो जावेगा इसी कारण ऋण धन दोनों संस्कारमें धन करनेसे वही स्पष्ट होजाती है यह तिथि नक्षत्र योगकी उपपत्ति समझनी चाहिये॥

अब तिथि नक्षत्र योग स्पष्ट करनेका क्रम लिखते हैं–जिस शालिवाहनीय शाकेकी तिथि स्पष्ट करना हो उस अभीष्ट शाकेको तिथिसारिणी चक्र नं. १ के शाकेमें घटावे (जो अभीष्ट शाके तुल्यही सारिणीका शाका होवे तो घटानेकी आवश्यकता नहीं और न शेषाब्दही होगा) जो शेष रहे उसके तुल्य शाके विशेष सारिणी चक्र नं. २ की तिथिकन्द वारादि और वल्लीकन्द (केन्द्र)के और पुस्तकीय शाकेके कोष्ठकके तिथि वार घटी पल और वल्ली (केन्द्र) को परस्पर जोड लेवे और तिथि जो ३० से अधिक होवे तो ३० के भागसे शेषित करलेवे और वार जो ७ से अधिक होवे तो ७ के भागसे शेषित करलेवे और वल्ली (केन्द्र) के ऊपरके अंक यदि ६० से

